ஸ்வாமியின் உத்தரவுடன் குண்டத்திற்கு பதினெட்டு ஸம்ஸ்காரங்கள்செய்து, குண்டத்திற்குரக்ஷையாப்ரம்ஹாவையும், விஷ்ணுவையும் பூஜித்து வாகீஸ்வரி, வாகீஸ்வரர்களைப் பூஜித்து அர்ணியை காயத்ரியாலும் மேல் அரணி சிகையாலும், கயிறை கவசத்தாலும் பூஜித்து சிவமந்த்ரத்தால் கடைந்து அக்னியை எடுக்க லாம். சூர்யகாந்தமணியைக் கொண்டு சூர்ய ஒளியில் காண்பித்து அக்னியை உண்டுபண்ணி இரண்டாகப் பிரித்து ஒரு பகுதியை ராக்ஷஸர்களுக்கு விட்டுவிட்டு ஒரு பகுதியைக் கொண்டு நிரீக்ஷணாதி சுத்தி செய்து ஸம்ஹார முத்ரையால் பூதாக்னியை பைந்தவ ஜாடராக்னிகளுடன் சேர்த்து மீண்டும் பூதாக்னியில் சேர்த்து வஹ்னிசைதன்யத்தை உண்டுபண்ணி அபிமந்த்ரணம், ரக்ஷாவகுண்டனாம்ருதீகரணங்கள் செய்து குண்டத்தில் சேர்த்து கர்பாதானாதி ஸம்ஸ்காரங்கள் செய்து ப்ரம்ஹா முதலியோரை யும், லோகபாலர்களையும், குண்டத்தைச் சுற்றிலும் பூஜித்து ஸ்ருக்ஸ்ருவ ஸம்ஸ்காரம், ஆஜ்ய ஸம்ஸ்காரம் செய்து வக்த்ரை கீகரணம், ஜிஹ்வைகீகரணம் செய்து நாமகரணம் செய்து வாகீஸ்வரீ, வாகீஸ்வரர்களை விஸர்ஜனம் செய்ய வேண்டும். வஸ்யாகர்ஷணங்களுக்கு ஹிரண்யா, ஸ்தம்பனத்திற்கு கனகா, தாபத்திற்குரக்தா, மாரணத்திற்குக்ருஷ்ணா, சாந்திகளில்ஸுப்ரபா, உச்சாடனத்தில் அதிரக்தா, அனைத்து கர்மபயனிற்கும் பஹுரூபா என்று ஜிஹ்வா ஹோமம் விசேஷம் சொல்லப்பட்டுள்ளது.

சரு, தூப, தீபம், இதர குண்டங்களுக்கென்று அக்னியைப் பிரித்துக்கொள்ளலாம்.

வேறொரு பக்ஷத்தில் சுத்தமான அக்னியை முன்போன்றே பைந்தவாக்னி ஜாடராக்னிகளுடன் சேர்த்து மீண்டும் குண்டத்தில் சேர்த்து ஸத்யாதிமந்த்ரங்களைப் பூஜித்து, ப்ரம்ஹாதி நால்வரை பூஜிப்பதுஅக்னிக்குலகுஸம்ஸ்காரமாகும்.அல்லதுஆஜ்யத்தினால் ஆத்மவித்யாசிவதத்வமந்த்ரங்களால் ஹோமம் செய்வதும் சிவாக் னிக்கு லகு ஸம்ஸ்காரமாகும். அல்லது பரஞ்ஜ்யோதியான பிந்து ரூபமான சிவனை மூலத்தால் அக்னியோடு சேர்ப்பதாலும் சிவாக்னி ஸித்திக்கிறது.

இவ்வாறு சொல்லப்பட்ட வழிகளில் ஒன்றைக்கடைப் பிடித்து சிவாக்னி உண்டு பண்ண வேண்டும்.

சிவாக்னியை உத்பத்தி செய்யாமல் செய்யும் ஹோமம் பயனற்றுப்போகும்.

சிவாக்னியை சிவனைப்போல் த்யானித்து அவருடைய இதயகமலத்தில் சிவனை பூஜித்து நாடீ ஸந்தானம் செய்து ஸஹஸ்ரம் முதல் இருபத்தியெட்டு வரை தன்னால் முடிந்த ஆஹுதிகளைக் கொடுக்க வேண்டும்.

பிறகு ஹோமத்ரவ்யங்களும், அதன் பலன்களும், அதன் அளவுகளும் சொல்லப்பட்டுள்ளன.

பூர்ணாஹுதி செய்து தாம்பூலாதிகள் கொடுத்து ஸ்வாமி நெற்றியில் ரக்ஷை இட்டு பாத்யாதி உபசாரங்கள் செய்து பராங் முகார்க்யம் கொடுத்து க்ஷமை ப்ரார்த்தித்து சிவனை வணங்கி ப்ரம்ஹாங்கங்களை சிவனோடு சேர்த்து அந்த சிவனை வஹ்னி யிலிருந்து ஆத்மாவில் சேர்த்து ப்ரம்ஹாதிகளுக்கு பலி கொடுத்து அக்னி, ஸோமன், அக்னிசோமர்கள், ஸ்விஷ்டக்ருத் ஆகியோருக்கு எள்ளாலும், நெய்யாலும் ஹோமம் செய்து அக்னியில் சண்டே சரை ஆவாஹனம் செய்து, ஹோமம் செய்து விஸர்ஜனம் செய்து விட்டு, தினமும் அக்னியை ரக்ஷணம் செய்வதாயிருந்தால் மறுநாட்களில் ஸம்ஸ்காரங்கள் குறைவு. அல்லது அக்னியை விஸர்ஜனம் செய்த பிறகு இரண்டு மண்டலங்கள் அமைத்து அந்தர்பலி, பஹிர்பலிகளைக் கொடுத்து கைகால்களை அலம்பி, ஆசமனம், ஸகலீகரணம் செய்து சிவனை அஷ்டபுஷ்பத்தால் பூஜித்து பாத்யாதிளைக் கொடுத்து நித்யோத்ஸவம், ந்ருத்தம் முதலியவற்றைச்செய்து சக்திக்கேற்ப ப்ராம்ஹணபோஜனம் செய்வித்து பூஜைஹோமம் முதலியவற்றாலுண்டான பயனை ஸ்வாமியிடம் ஸமர்ப்பித்து ஜபம் செய்து ஸ்லோகம் படித்து அஷ்டபுஷ்பம் சாற்றி ஆவரண தேவதைகளுக்கு பராங்முகார்க்யம் கொடுத்து சிவனோடு சேர்த்து சிவனை தன் ஹ்ருதயத்தில் சேர்த்து, குரு த்வாரபர்களுக்கு பராங்முகார்க்யம் கொடுத்து இதர குருமுதல் அனைத்து த்வார தேவதைகளையும் விஸர்ஜனம் செய்து விட்டு

சண்டார்ச்சனை செய்து ஜபம் செய்து நிர்மால்யம் சாற்றி ஸ்லோகம் படித்து சண்டேஸ்வரரையும் விஸர்ஜனம் செய்து நிர்மால்யங்களை எடுத்து விட்டு பூஜை செய்த இடத்தை கோமயத்தால் மெழுகி கைகால்களை அலம்பி ஸகலீகரணம் செய்து சிவாதி மந்த்ரங்களை ஜபிக்க வேண்டும்.

இவ்வாறு ஸந்திகளில் சிவாராதனையைச் செய்ய வேண்டும்.

இவ்வாறு சைவாகம சக்ரவர்த்தி ஸ்ரீக்ருஷ்ணாசார்யர் சிஷ்யரும் சைவாகதத்வமறிந்தவரும், எப்போதும் ஆஹிதாக்னியாயுள்ள ஸ்ரீ விஸ்வநாதன் என்பவரால் ஹோமம் முதலிய கர்மங்களின் முறையாகச் சொல்லப்பட்டுள்ளது. *(1 - 214)*

இவ்வாறாக சுத்தசைவாகமாசார்யர் ஸ்ரீக்ருஷ்ணயோகீந்த்ரர் சிஷ்யரும், உபயவேதாந்தி பாஸ்கரரின் குமாரரும், யாகங்கள் செய்தவருமான ஸ்ரீ விஸ்வநாதன் என்பவரால் இயற்றப்பட்ட ஸித்தாந்தசேகரத்தில் நித்யகாண்டத்தில் சிவாக்னிகார்யாதி விதானமென்னும் மூன்றாவது பகுதி நிறைவுறுகிறது.

14. ஆகமார்ச்சனவிதானம்

கோடிப்ரமாண க்ரந்தங்கள் வித்யாபீடம் எனப்படும். அல்லது லக்ஷமாவது வைத்து பூஜை செய்ய வேண்டும். பூஜையில் ப்ரதானமாக ஸதாசிவரை பூஜை செய்ய வேண்டும். பிறகு சிவன் முதலிய குருக்களையும் சிவஞானத்தின் அவதாரமாக இருக்கக் கூடிய ஸத்வாதி முதலிய குணங்களோடு கூடியவர்களான வித்யேஸ்வரர்களையும் பூஜை செய்ய வேண்டும். மேலும் ஆகம பேதங்களை சுருக்கமாகப் பார்ப்போம்.

ஆகமங்கள் சைவம், பாஞ்சராத்ரம், பௌத்தம், ஆர்ஹதம் என்று நான்கு பேதங்களாக உள்ளன. அதிலும் சைவாகமமே ப்ரதானம். அதிலும் சைவம், பாசுபதம், ஸோமம், லாகுலம் என்று நான்கு வகைகள் உள்ளன. அதிலும் சைவமே ப்ரதானம் சுபம் ஆகும். பாசுபதம் முதலியவை ரௌத்ரமெனப்படும். சைவத்திலும் ஸித்தாந்தம், தக்ஷிணம், வாமம், மிஸ்ரம் என நான்கு

வகையாகும். அதில் ஸித்தாந்தமே உத்தமமாகும். ஆகவே, மற்றைய பேதங்களை விடுத்து சைவஸித்தாந்தத்தை மட்டும் பார்ப்போம். சைவஸித்தாந்தம் இருபத்தெட்டு வகை. அவற்றில் முதல் பத்து சைவபேதம், பின் பதினெட்டு ரௌத்ரபேதம். பாஞ்சராத்ரம், பாசுபதம் முதலிய பேதங்களில் தந்த்ரஸங்கரம் செய்தால் தோஷம் ஏற்படும். ஆனால் இருபத்தெட்டு ஆகமங்களில் தந்த்ரகளப்பு செய்தாலும் தந்த்ரஸங்கர தோஷம் ஏற்படாது. ஏனென்றால் ஆகமங்கள் இருபத்தெட்டாயினும் அவற்றிற்கு ஒரே தந்த்ர தன்மையே உள்ளது. பொதுவாக எந்த தந்த்ரத்தால் நித்ய நைமித்திகாதிகள் ஆரம்பிக்கப்பட்டதோ அந்த தந்த்ரத்தாலேயே பூர்த்தி செய்ய வேண்டும். அவ்வாறு அதற்கு ப்ரமாணம் கிடைக்காவிடில் அதன் உபாகமங்களிலிருந்து எடுத்துக் கொள்ளலாம். அவ்வாறும் கிடைக்காவிடில் வேறொரு ஆகமத்திலிருந்து எடுத்துக் கொள்ளலாம்.

சைவாகமங்கள் காமிகம், யோகஜம், சிந்த்யம், காரணம், அஜிதம், தீப்தம், ஸூக்ஷ்மம், ஸஹஸ்ரம், அம்சுமான், ஸுப்ரபேதம், விஜயம், நிஸ்வாஸம், ஸ்வாயம்புவம், அநலம், வீரம், ரௌரவம், மகுடம், விமலம், சந்த்ரஞானம், பிம்பம், ப்ரோத்கீதம், லலிதம், ஸித்தம், ஸந்தானம், சர்வோக்தம், பாரமேஸ்வரம், கிரணம், வாதுளம் என்று இருபத்தெட்டாகும்.

ஸதாசிவனின் ஸத்யோஜாத முகத்திலிருந்து காமிகம் முதலிய ஐந்தும், வாமதேவத்திலிருந்து தீப்தம் முதலிய ஐந்தும், அகோர முகத்திலிருந்து விஜயம் முதலிய ஐந்தும், தத்புருஷ முகத்திலிருந்து ரௌரவம் முதலிய ஐந்தும், ஈசான முகத்திலிருந்து ப்ரோத்கீதம் முதலிய எட்டும் தோன்றின. சைவபேதங்களான முதல் பத்தையும் கேட்டவர்கள் மூன்று மூன்று நபர்களும், பின் பதினெட்டிற்கு இரண்டு இரண்டு நபர்கள் கேட்டவர்கள் ஆவர்.

காமிகத்திற்கு ப்ரணவர், த்ரிகலர், ஹரர், யோகஜத்திற்கு ஸுதா, பஸ்மர், விபு, சிந்த்யத்திற்கு ஸுதீப்தர், கோபதி, அம்பிகா காரணத்திற்கு சர்வருத்ரர், காரணஞர், ப்ரஜாபதி அஜிதத்திற்கு ஸுசிவர், சிவர், ச்யுதர், தீப்தத்திற்கு ஈசர், த்ரிமூர்த்தி, ஹுதாசனர், ஸூக்ஷ்மத்திற்கு வைஸ்ரவணர், ஸூக்ஷ்மர், ப்ரபஞ்ஜனர்,

ஸஹஸ்ரத்திற்கு காலர், பீமர், தர்மர், அம்சுமானிற்கு அம்பு, அக்ரர், ரவி ஸுப்ரபேதத்திற்கு தசேசர், விக்னராட், சசி விஜயத்திற்கு அநாதி, பரமேசர், நிஸ்வாஸத்திற்கு தசார்ணர், கிரிஜா, ஸ்வாயம்புவத்திற்கு நிதனர், நலினோத்பவர், அநலத்திற்கு வ்யோமாக்யர், அக்னி ஸம்ஞுகர், வீரத்திற்கு வ்யோமாக்யர், ப்ரஜாபதி ரௌரவத்திற்கு ப்ரம்ஹேசர், நந்தி, மகுடத்திற்கு சிவாக்யர், மஹாதேவர் விமலத்திற்கு ஸர்வாத்மகர், வீரபத்ரர், சந்த்ரஞானத்திற்கு அநந்தர், ப்ருஹஸ்பதி, பிம்பத்திற்கு ப்ரசசாந்தர், ததீதி, ப்ரோத்கீதத்திற்கு சூலீ, கவசர் லலிதத்திற்கு லயர், ருத்ரபைரவர் ஸித்தத்திற்கு வீரர் சண்டேஸ்வரர், ஸந்தானத்திற்கு சிவநிஷ்டர், அம்ஸவாஸி, சர்வோக்தத்திற்கு ஸோமதேவர், ந்ருஸிம்ஹர், பாரமேஸ்வரத்திற்கு ஸோமதேவர், ஸ்ரீதேவீ, உசனாஃ, கிரணத்திற்கு தேவவிபவர், ஸம்வர்தர், வாதுளத்திற்கு சிவர், மஹாகாலர் என்றிவ்வாறு சிவ பேதத்திற்கு ஸ்ரோதாக்கள் முப்பது நபர்களும், ருத்ரபேதத்திற்கு முப்பத்தாறு நபர்களும் ஸ்ரோதாக்களாகும். இவ்வாறு அறுபத்தாறு நபர்கள் ஸ்ரோதாக்களாகும். மஹேஸ்வரரே இவர்களனைவருக்கும் குருவாவார்.

காமிகத்திற்கு பரார்த்தஸங்க்யை க்ரந்தங்களாகும், இவ்வாறே யோகஜத்திற்கு லக்ஷம், சிந்த்யத்திற்கு நூறாயிரம், காரணத்திற்கு கோடி, அஜிதத்திற்கு பத்தாயிரம், தீப்தத்திற்கு லக்ஷம், ஸூக்ஷ்மத்திற்கு நூறு கோடி, ஸஹஸ்ரத்திற்கு நூறு லக்ஷம் கோடி, அம்சுமத்திற்கு ஐந்து லக்ஷம், ஸுப்ரபேதத்திற்கு மூன்று கோடி, விஜயத்திற்கு மூன்று கோடி, நிஸ்வாஸத்திற்கு கோடி, ஸ்வாயம்புவத்திற்கு ஒன்றரைக்கோடி, அநலத்திற்கு முப்பதாயிரம், வீரத்திற்கு லக்ஷம், ரௌரவத்திற்கு எட்டு அர்புதம் (அர்புதம் = பத்து கோடி), மகுடத்திற்கு லக்ஷம், விமலத்திற்கு மூன்று லக்ஷம், சந்த்ரஞானத்திற்கு மூன்றுகோடி, பிம்பத்திற்கு லக்ஷம், ப்ரோத்கீதத்திற்கு மூன்று லக்ஷம், லலிதத்திற்கு எட்டாயிரம், ஸித்தத்திற்கு ஒன்றரைக்கோடி, ஸந்தானத்திற்கு ஆறாயிரம், சர்வோக்தத்திற்கு இரண்டு லக்ஷம், பாரமேசத்திற்கு பன்னிரெண்டு லக்ஷம், கிரணத்திற்கு ஐந்துகோடி, வாதுளத்திற்கு லக்ஷம் என்று க்ரந்தங்களின் எண்ணிக்கை சொல்லப்பட்டுள்ளது.

காமிகத்திற்கு வக்தாரம், பைரவோத்தரம், நாரஸிம்ஹம், என்று மூன்று யோகஜத்திற்கு தாரம், வீணாசிகோத்தரம், ஆத்ம யோகம், ஸந்தம், ஸந்ததிঃ என்று ஐந்து, சிந்த்யத்திற்கு ஸுசிந்த் யம், ஸுபகம், வாமம், பாபநாசம், பரோத்பவம், அம்ருதம் என்று ஆறு காரணத்திற்கு மாஹேந்த்ரம், பாவநம், தௌர்கம், மாரணம், பீமஸம்ஹிதா, வித்வேஷம், காரணம் என்று ஏழு, அஜிதத்திற்கு பார்வதீ, பரோத்பூதம், ப்ரபூதம், பத்மஸம்ஹிதா என்று நான்கு தீப்தத்திற்கு - அமேயம், அக்ஷயம், அப்ஜம், ஆநந்தம், அமி தௌஜஸம், மாதவோத்பவம், ஆச்சாத்யம், அஸங்க்யம், அத் புதம் என்று ஒன்பது, ஸூக்ஷ்மத்திற்கு ஸூக்ஷ்மம் என்று ஒன்று ஸஹஸ்ரத்திற்கு - அதீதம், அமலம், சுத்தம், அப்ரமேயம், ஸுபோத கம், ஜாதிபாக், விபுதம், ஹஸ்தம், அலங்காரம், ப்ரபுத்தகம் என்று பத்து அம்சுமத்திற்கு - காஸ்யபம், வாஸவம், ப்ராம்ஹம், கௌதமம், நீலலோஹிதம், வித்யாபுராணம், வாஸிஷ்டம், பூத தந்த்ரம், ஐந்த்ரம், ஆத்மாலங்காரம், ஈசானோத்தரம், ப்ரகரணம் என்று பன்னிரெண்டு என்றிவ்வாறு உபாகமங்கள் உள்ளன. ஸுப்ரபேதத்திற்கு உபாகமம் இல்லை மேலும் விஜயத்திற்கு - ம்ருத்யுநாசம், பவம், ஸௌம்யம், குபேரேசம், உத்பவம், அகோரம், மஹாகோரம், விமலம், என்று எட்டு நிஸ்வாஸத்திற்கு - நிஸ்வாஸம், கோரநிஸ்வாஸம், நிஸ்வாஸநயனம், ஸுதா, நிஸ்வாஸோத்தரம், நிஸ்வாஸகுஹ்யம், நிஸ்வாஸவதனோதயம், நிஸ்வாஸகாரிகா என்று எட்டு ஸ்வாயம்புவத்திற்கு - ப்ரஜாபதி, மதம், பத்மம் என்று மூன்று அநலத்திற்கு - ஆக்னேயம், வ்யோம ஸம்ஞம் என்று இரண்டு வீர்த்திற்கு - ப்ரஸ்தரம், புல்லநயனம், ப்ரபோதம், போதபோதகம், அமோஹம், மோஹஸமயம், சாக டம், சகடாதிகம், விலேகநம், விமலம், ஹலம், பத்ரம், வீரம் என்று பதின்மூன்று ரௌரவத்திற்கு காலாக்யம், காலதஹனம், ரௌரவம், ரௌரவோத்தரம், மஹாகாலம், ஐந்த்ரம் என்று ஆறு மகுடத்திற்கு - மாகுடம், மகுடோத்தரம் என்று இரண்டு விமலத்திற்கு - அலங்க்ருதம், விஷம், ரௌத்ரம், அட்டஹாஸம், வ்ருஷோதரம், ஆரேவதம், அதிக்ராந்தம், வ்ருஷபிங்கம், ஸுபத்ரம், ஆக்ராந்தம், அர்சிதம், போகம், அநந்தம், மாரணம், வ்ருஷகுஹ்யம், ஸுதத்தம் என்று பதினாறு சந்த்ரஞானத்திற்கு - ஏகபாதபுராணம், ஸ்தாணு, நந்திகேஸ்வரம், ஸ்ரீமுகம், சங்கரம், வாயவ்யம், சிவசாஸநம், சிவபத்ரம், கல்பபேதம், வாருணம்,

சிவசேகரம், தேவீமதம், ஸ்திரம், வ்யாப்தம், என்று பதினான்கு முகபிம்பத்திற்கு - அர்த்தாலங்காரம், ஈசானம், ப்ரதிபிம்பம், அயோகஜம், தௌடிகம், துடிநீரம், குட்டிமம், பட்டசேகரம், மஹாவித்யா, மஹாஸாரம், துலாப்ரத்யயம், நைர்ருதம், சதுர் முகம், துலாகோடி, ஸம்ஸ்தோபம் என்று பதினைந்து ப்ரோத் கீதத்திற்கு - சைவஞானம், கவசம், வாராஹம், பிங்களாமதம், காலஞானம், தனுர்வேதம், ஆயுர்வேதம், தனுர்தரம், விஞானம், அங்குசம், கீதம், ஆதோத்யம், பரதம், பாசபந்தம், தண்டதரம், ஸர்பதம்ஷ்ட்ரம் பதினாறு லலிதத்திற்கு - லிலிதோத்தரம், லலிதம், கௌமாரம் என்று மூன்று ஸித்தத்திற்கு - சாலம், ஔநஸம், ஸாரஸங்க்ரஹம், சசிமண்டலம், என்று நான்கு ஸந்தானத்திற்கு - அமரேசம், ஸுராத்யக்ஷம், லிங்காத்யக்ஷம், அஸங்க்யகம், அநிலம், சங்கரம், த்வந்த்வம் என்று ஏழு சர்வோக்தத்திற்கு - ஈசானம், சிவதர்மம், சிவதர்மோத்தரம், திவ்யப்ரணீதம், ஸோமாக்யம், என்று ஐந்து பாரமேஸ்வரத்திற்கு - ஸாமாந்யம், யக்ஷிணம், ஹம்ஸம், மாதங்கம், ஸுப்ரயோகம், பத்மம், புஷ் கரம் என்று ஏழு கிரணத்திற்கு - காருடம், நிர்ருதி, நீலம், ரூக்ஷம், புத்தம், ப்ரபுத்தம், தேனுகம், பாவநீயம், காலாக்யம் என்று ஒன்பது வாதுளத்திற்கு - விஸ்வம், விஸ்வாத்மகம், த்வந்த்வம், காலஞானம், மஹாமுகம், ஸர்வம், ஸர்வாத்மகம், சுத்தம், ஸ்ரேஷ்டம், நித்யம், ப்ரரோஹிதம், வாதுளோத்தரம் என்று பன்னி ரெண்டு என்றிவ்வாறு இருபத்தெட்டாகமங்களுக்கும் இருநூற் றெட்டு உபாகமங்கள் உள்ளன.

பரமேஸ்வரனுடைய அங்கங்களில் இவ்வாகமங்கள் நிலைத்துள்ளன. அவை, காமிகம் - பாதங்களிலும், யோகஜம் - கெண்டைக்கால்களிலும், சிந்த்யம் - கால் நகங்களிலும், காரணம் - கணுக்கால்களிலும், அஜிதம் - முழங்கால்களிலும், தீப்தம் - தொடைகளிலும், ஸூக்ஷ்மம் - மறைவிடங்களிலும், ஸஹஸ்ரம் - இடுப்பிலும், அம்சுமான் - பின்பகுதியிலும், ஸுப்ரபேதம் - நாபியிலும், விஜயம் - வயிற்றிலும், நிஸ்வாஸம் - ஹ்ருதயத்திலும், ஸ்வாயம்புவம் - மார்பகங்களிலும், அநலம் - கண்களிலும், வீரம் - கழுத்திலும், ரௌரவம் - காதுகளிலும், மகுடம் - மகுடத்திலும், விமலம் - தோல்களிலும், சந்த்ரஞானம் - மார்புப்பகுதியிலும், முகபிம்பம் - முகத்திலும், ப்ரோத்கீதம் - நாக்கிலும், லலிதம்

- கண்ணப்பகுதியிலும், ஸித்தம் - நெற்றியிலும், ஸந்தானம் - குண்டலங்களிலும், சர்வோக்தம் - பூணூலிலும், பாரமேஸ்வரம் - ஹாரத்திலும், கிரணம் - ரத்னபூஷணத்திலும், வாதுளம் - நாடி களிலும் பரமேஸ்வரனுடைய சரீரத்தில் இவ்வாகமங்கள் அதிஷ் டித்துள்ளன. *(1 - 94)*

15. கபிலார்சனவிதி

பசுக்கள் ஐந்து வகை சிவலோகத்திலிருந்து பூமிக்கு வந்துள்ளன. அவை ஸுநந்தா, ஸுபத்ரா, ஸுசீலா, ஸுரபி, விமலா என்று ஆண் பசுக்கள் பெண் பசுக்களுமாகும். அனைத்தும் தேவஸ்வ்ரூபமாயிருக்கும். இந்த பசுக்களுக்கு புல் கொடுத்து வழிபடுவதே சிறப்பானதாகும்.

ஸௌரபேயி என்று தொடங்கும் இந்த ஸ்லோகங்களை மூன்று வேளையும் சொல்லி பசுக்களுக்கு புல் கொடுத்து வழி படுபவர் சிவலோகம் அடைவார். *(95 - 103)*

16. போஜனவிதி

மதிய நேரத்தில் வீட்டை கோமயத்தால் மெழுகி குளித்து விட்டு இறைவனைப்பூஜித்து அஷ்டபுஷ்பம் சாற்றி சங்கத்தில் தர்பைஜலம் எடுத்து ம்ருத்யுஞ்ஜய மந்த்ரத்தை வௌஷடந்தமாக ஏழு முறை ஜபித்து அஜ்ஜலத்தால் சமையலறை, வீடு முழுதும் ப்ரோக்ஷணம் செய்து சமைத்ததில் பாதியை இறைவனுக்கு அர்ப்பிக்க வேண்டும். அதன் முறையினைப்பார்ப்போம்.

முன்போல் அடுப்பை சுத்தம் செய்து அதிலுள்ள அக்னியை தன் பூரகத்தால் எடுத்து நாபியிலுள்ள அக்னியில் கும்பகத்தால் சேர்த்து ரேசகத்தால் வெளியே எடுத்து அடுப்பிலுள்ள அக்னியில் சேர்த்து சிவக்னியாய் இருக்கிறாய் என்று ப்ரார்த்தித்து, அவ்வக்னி யில் - அக்னி, ஸோமன், ஸுர்யன், ப்ருஹஸ்பதி, ப்ரஜாபதி, ஸர்வதேவர்கள், விஸ்வேதேவர்கள், ஸ்விஷ்டக்ருதக்னி, அக்னி முதல் இந்த்ரன் வரையிலான திக்பாலர்கள் என்றிவர்களைப் பூஜை செய்து இவர்களுக்கு ஸ்வாஹாந்தமாக ஹோமம் செய்து விஸர்ஜனம் செய்து, அடுப்பின் வலது தோலில் தர்மத்தையும், இடது தோலில் அதர்மத்தையும் பூஜை செய்து வீட்டின் மற்றைய

இடங்களிலும் சில தேவதைகளைப் பூஜை செய்து பலி கொடுக்க வேண்டும். ஜலத்தில் வருணன், முக்யத்வாரத்தில் விக்நேசர், பேஷணியில் ஸூபகர், ரௌத்ரி, உரலில் கோடகிரிகா, உலக்கையில் பலபத்ரர், துடைப்பத்தில் ம்ருத்யு, தலையணையில் காமன், வீட்டின் நடுவிலுள்ள ஸ்தம்பத்தின் அடியில் ஸ்கந்தன் வீட்டிற்கு வெளியில் காகம் முதலியவை என்றிவர்களுக்கு பலி கொடுத்து விட்டு கால்களை அலம்பிக்கொண்டு ந்யாஸம் செய்து கொண்டு சாப்பிடும் அறையை மறைத்து விட்டு உள்ளே நுழைந்து தன் வர்ணத்தினருடன் சாப்பிட வரிசையாய் அமர்ந்து ஆசார்யர், ஸாதகர், புத்ரன், ஸமயீ என்ற க்ரமப்படி வீராஸனராய் கிழக்கு நோக்கி அமர்ந்து பஸ்மத்தால் கோடிட்டு தங்கம் முதலியவற்றால் செய்த பாத்ரத்திலோ அல்லது வாழை, மா, புரசு, இலுப்பை, தாமரை ஆகிய இலைகளில் ஒன்றை ஏழு முறை அகோர மந்த்ரத்தால் சுத்தம் செய்து இடது கையை கீழூன்றி இரண்டு முழங்கால்களுக்கும் இடையே இரண்டு கைகளும் இருக்கும்படி செய்து நெய்யினால் சாதம், பருப்பு, காய்கறிகள் ஆகியவற்றை அஸ்த்ரமந்த்ரத்தால் ப்ரோக்ஷணம் செய்து ம்ருத்யுஞ்ஜய மந்த்ரத்தால் ஏழு முறை அபிமந்த்ரணம் செய்து வயிற்றிலுள்ள அக்னி அஸ்த்ர மந்த்ரத்தால் எரிவதாய் பாவித்து பரிஷேசனம் செய்து பூர்வாபோசனம் செய்து ப்ராணம் முதலிய மந்த்ரங்களால் ப்ரணவத்துடன் ஸ்வாஹந்தமாக ஆஹூதிகள் செய்து நாகன் முதலிய உபவாயுக்களுக்கு நிவேதனம் செய்து திட்டமான நெய் பருப்பு கலந்த அன்ன கவளங்களால் பாதி வயிற்றை நிரப்ப வேண்டும். கால் பகுதி ஜலத்தினாலும் நிரப்பி, கால் பகுதி வாயுவிற்கு விட வேண்டும். சாப்பிடும் பொழுது அன்னம் முதலியவை கையில் தரப்பட்டது. உப்பு, முருங்கை, விஷங்கலந்த மாம்ஸம், பூண்டு, வெங்காயம், மாம்ஸம், கரகம், தேன், மாவிலங்கை போன்ற ஒதுக்கப்பட்ட அனைத்தையும் தவிர்த்து விடவேண்டும். சாப்பிட்டுக்கொண்டே உப்பு, நெய் இவற்றை எடுக்கக்கூடாது. பிறர் பருகிய மீத ஜலத்தை பருகக்கூடாது. கேசம், எரும்பு முதலியவை இருந்தால் அந்தப்பகுதியை ஒதுக்கி வைத்து விட்டு கையை அலம்பிக்கொண்டு மீதமுள்ளதை சாப்பிட வேண்டும்.

முனிவர்கள் எட்டு கவளங்களும், வானப்ரஸ்தர்கள் பதினாறு கவளங்களும், க்ருஹஸ்தர்கள் முப்பத்தியிரண்டு

கவளங்களும், விருப்பம்போல் ப்ரம்ஹசாரிகளும் சாப்பிட வேண்டும். இவ்வாறு உண்டுவிட்டு மௌனமாக இருந்து கொண்டு உத்தராபோஜனம் செய்து விட்டு பாதி சுளுக அளவு ஜலம் உண்டு மீதியை பூமியில் விட வேண்டும். அஜ்ஜலத்தால் நாகங்கள் மகிழ்கின்றன. கையை அலம்பிக்கொண்டு ஆசமனம் செய்து கட்டைவிரலால் ஜலத்தை வலது கால் கட்டை விரலில் ஆத்னோ என்னும் கீழ்க்காணும் மந்த்ரம் சொல்லி விட வேண் டும். பிறகு கரந்யாஸம், அங்கந்யாஸம் செய்து கொண்டு பரிக முத்ரையைப்போட வேண்டும். இவ்வாறு போஜன விதி சொல் லப்பட்டுள்ளது. பிக்ஷாடன விதியைப்பார்ப்போம். ।। *104 - 140* ।।

17. பிக்ஷாடன விதி

சிஷ்யர் பஸ்மஸ்நானம் செய்து விட்டு கௌபீனம், உத்தரீயம் தரித்து ஆசமனம் செய்து விட்டு குருவை வணங்கி விட்டு, குருவின் உத்தரவைப்பெற்று, மௌனமாக பிக்ஷா பாத்ரத்தை அகோரமந்த்ரம் அபிமந்த்ரணம் செய்து எடுத்துக் கொண்டு, அஸ்த்ரமந்த்ரம் அபிமந்த்ரணம் செய்து தண்டத்தை எடுத்துக்கொண்டு, இடது கையால் குடை எடுத்துக் கொண்டு நல்லோர்களும், ஸ்ரௌத ஸ்மார்த்தாதிகளை அனுஷ்டிப்பவர் களுமான ப்ராம்ஹணர்களின் வீட்டிற்குச் சென்று பிக்ஷாம் தேஹி என்று கேட்க வேண்டும்.

பிக்ஷை கேட்பவர் ப்ராம்ஹணராகில் பவதி பிக்ஷாம் தேஹி என்றும், க்ஷத்ரியராகில் பிக்ஷாம் பவதி தேஹி என்றும், வைஸ்ய ராகில் பிக்ஷாம் தேஹி பவதி என்றும் கேட்க வேண்டும்.

இவ்வாக்யம் கேட்டு உள்ளேயிருந்து வருபவரின் பாதத்தை நோக்கி கேட்க வேண்டும். கொடுப்பவர் பசுவைக்கண்ட கன்று போல் ஆவலுடன் வர வேண்டும். அவ்வாறு வருபவரிடம் சற்று தோய்வு தெரிந்தால் அடுத்த வீட்டிற்குச்செல்ல வேண்டும்.

பிக்ஷையை இலையாலோ, கரண்டியாலோ, வெண்கலத் தாலோ கொடுக்கக்கூடாது.

வ்ருஷலீ, கர்ப்பிணீ, அசுத்த ஆடை தரித்தவர், பதிதர், நாட்யோபஜீவீ, கிராதர், தங்கவேலை இரும்புவேலை செய்பவர், தேவலகர் போன்றோரிடமிருந்து பிக்ஷையைப் பெறக்கூடாது. பிக்ஷாபத்ரத்தில் சேர்ந்த அன்னம் தூய்மையானதாக சொல்லப் பட்டுள்ளது. இவ்வாறு செய்யும் பிக்ஷையை மதுகரி வ்ருத்தி என்று சொல்வர். அதாவது புஷ்பத்திலிருந்து தேன் எடுப்பதால் புஷ்பத்திற்கு எவ்வாறு பாதிப்பில்லையோ, அது போல் பிக்ஷை கொடுக்கும் க்ருஹஸ்தருக்கு பாதிப்பில்லாமல் அமைய வேண் டும். பிக்ஷை கேட்காமலேயே கொடுக்கப்பட்டால் அவர் ப்ருஹஸ் பதிக்கு ஸமமான தகுதியடைகிறார்.

தானோ பிறரோ மிகவும் வற்புறுத்தி பெறும் பிக்ஷை நிந்திதமாகும். அவ்வாறு பெறுவது புகழ் தர்மங்களை அழிக்கும், நரகம் கொடுக்கும்.

இவ்வாறு தூய்மையாகப் பெறப்பட்ட பிக்ஷையை சுபமாகப் புகழ்ந்து தூய்மையான இடத்தில் வைத்து விட்டு கைகால்களை அலம்பிக்கொண்டு ஆசமனம் பஸ்மஸ்னானம் செய்து கொண்டு, பிக்ஷையை அஸ்த்ரத்தால் ப்ரோக்ஷணம் செய்து ம்ருத்யுஞ்ஜய மந்த்ரத்தால் அம்ருதீகரணம் செய்து மூன் றாகப் பிரித்து ஒரு பாகத்தை சம்புவிற்கு நிவேதனம் செய்து விட்டு இரண்டாம் பாகத்தை குருவிற்கு தந்துவிட்டு மீதத்தை தான் உண்ணவேண்டும். இவ்வாறு சைவாகமங்களில் சொல்லப் பட்டுள்ள பிக்ஷாடன விதி நிறைவுறுகிறது.

பிறகு ஸாயங்காலம் வரை ஸ்வாத்யாயம் செய்ய வேண்டும். மாலையில் ஸந்த்யாவந்தனம் முடித்து சிவனை பூஜித்து இரவில் தூய்மையான இடத்தில் ஹ்ருதயத்தாமரையில் சிவபெருமானை த்யானம் செய்து கொண்டு யோகநித்ரை செய்ய வேண்டும். நடு இரவில் எழுந்து பஸ்மஸ்நானம் செய்து பகலில் கொண்டு வந்த ஜலம் புஷ்பம் முதலியவற்றால் சிவனை பூஜிக்க வேண்டும். பிறகு மீண்டும் உறங்கி காலையில் எழுந்து ஸ்நானம் முதலிய நித்யகாண்டத்திலுள்ள க்ரியைகளை ஒவ்வொரு நாளும் செய்ய வேண்டும்.

சைவாகம சக்ரவர்த்தியாகிய ஸ்ரீக்ருஷ்ணாசார்யரின் சிஷ்யரும், சைவாகம தந்த்ரம் அறிந்தவரும், நன்கு யக்ஞ கர்மாக்களை கடைபிடிப்பவருமான ஸ்ரீ விஸ்வநாதரால் பிக்ஷாடன விதி சொல்லப்பட்டுள்ளது.

இவ்வாறு சைவாகமாசார்யர் ஸ்ரீக்ருஷ்ணபண்டிதரின் சிஷ்யரும், உபய வேதாந்தி பாஸ்கரரின் குமாரரும், அக்னிஷ்டோமம் செய்தவருமான ஸ்ரீ விஸ்வநாதன் என்பவரால் இயற்றப்பட்ட சித்தாந்த சேகரம் எனும் நூலில் நித்ய காண்டத்தில் ஆகமார்சா, கபிலார்சா, போஜனவிதி, பிக்ஷாடனவிதானம் எனும் நான்காம் பகுதி நிறைவுறுகிறது. *(141 - 166)*

இவ்வாறு நித்யகாண்டம் முடிகிறது.

श्री विश्वनाथकृतः

सिद्धान्तशेखरः

नित्यकाण्डः

श्री गणेशाय नमः

श्री विश्वनाथकृतः

सिद्धान्तशेखरः

श्रीकण्ठं शरणमहं सदा प्रपद्ये
ज्ञानास्यै हृदयवचःशरीरभावैः।
चिद्रूपं विमलमनन्तमप्रमेयं
सर्वा[1]ध्वप्रभवमनामयं दयालुम् ॥१॥

अभूदादौ महर्षीणां सन्ततौ हारितो मुनिः।
अङ्गिराश्चांस्वरीषः[2] श्रीयौवनाश्वो[3] मुनीश्वरः ॥२॥

तद्वंशेऽजनि विश्रुतो[4] द्विजवरो नारायणो नामतः
साङ्गायाः श्रुतिसन्ततेर्दृढतरज्ञान[5]श्चतुर्वेदवित्।
सर्वातिथ्यपरः कृताग्निचयनो[6] मिश्रोऽपि[7] सर्वक्रतु[8]
र्विख्यातः स तु[9] पौण्डरीकमखकृद्योयोगवित्तत्त्ववित् ॥३॥

तत्पुत्रो देवदत्तोऽभूत्सर्वक्रतुरथाग्निचित्।
पौण्डरीकक्रतोः कर्ता मिश्रः[10] सर्वातिथिप्रियः ॥४॥

सत्सूनुर्नारसिंहः कृतसकलमखः पौण्डरीकस्य[11] कर्ता
कर्ता[12] सर्वातिथीनामपि यजनविधे[13] रग्निचिद्वैष्णवाख्यः[14]।
यश्चक्रे कल्पसारं नरहरिविषयं षट्सहस्रं सहार्थं[15]
चालुक्याना[16] मधीशे धृत[17] हरिकरुणो यः[18] प्रतापाख्यभूपे ॥५॥

---

[1] सर्वर्थ c [2] अङ्गिरसाम्बरीष b [3] श्रीमयौवनाश्वः a [4] विश्रुतिर्दिज a [5] दृढतरात् ज्ञानात् e
[6] परोद्धृताग्नि l [7] सित्रोऽपि c [8] तत्सर्वक्ति b [9] तत h [10] मित्रः i [11] पौण्डरीकः कृतोर्यः j
[12] मिश्रः m [13] यजननयेदग्निचित् b [14] वौष्णवोऽसौ n [15] महार्धं e, मदार्धं l,
[16] चालुज्यानां c, वालुज्यनां b [17] कृत a [18] सप्रताप f

विहित[1]सकलवादो[2] विश्वशास्त्रार्थवेत्ता
विहितनिखिलयागो विश्वनाथोपकण्ठे।
सुरसरिदभिषिक्तोऽथाग्नि[3]चित्सर्ववेदो
व्यपगत[4]भवबन्धो[5] भास्करस्तस्य सुनुः। ॥६॥

तत्पुत्रो विश्वनाथोऽभूद्विश्वनाथार्चने रतः।
वेदशास्त्रार्थतत्त्वज्ञः सदाचारपरायणः ॥७॥

मीमांसोदधि[6]पारगः श्रुतिगतोऽर्थस्य[7] वेत्ताकवि
स्तर्कोर्क[8]मतिः शमी समभवत्काव्यप्रबन्धाधिकृत्।
वेदान्त[9]द्वयनिश्चितार्थनिपुणः शब्दौघशास्त्रार्थवित्
श्रीकण्ठाङ्घ्रिसरोजयाग[10] चतुरस्तस्यात्मजो भास्करः ॥८॥

सूनुः श्रीभास्करस्यास्ति विश्वनाथो द्विजोत्तमः।
कृतयज्ञः शिवाचार्यः कथ्यतेऽथ गुरूत्तमः[11] ॥९॥

काशीक्षेत्रतटे[12] निवासनिरतो गङ्गाभिषेकावृतो
विश्वेशस्य पदाम्बुजार्चनरतो[13] वेदार्थविच्छास्त्रवित्[14]।
श्रीकृष्णः प्रवरो गुरुः स भगवान्[15] शैवागमज्ञः[16] सुधीः
योगाभ्यासगृहीतमानसमरुद्विज्ञान[17] चिद्रूपदृक् ॥१०॥

तच्छिष्योऽस्ति महाकविर्द्विजवरः श्रीकृष्ण[18]नामा गुरुः
शब्दज्ञानमहोदधिः श्रुतिनिधिस्तर्कादिकाव्याकरः[19]।

---

[1] विदित a [2] वेदी c [3] योग्निचित् d [4] न्यपगत b [5] बोधो c [6] मीमांसादधि n
[7] श्रुतिततेरर्थस्य c, श्रुतिगतस्यार्थस्य e [8] दर्कमितिश्रमी m [9] वेदान्ताद्वय n
[10] सरोजयोग f, सरोजयज्ञ k [11] गुरुक्रमः h, [12] तटिन्निवास i [13] परो a
[14] विश्वाधिदेयादिकृत् d [15] परतरः b [16] मज्ञाग्रणीः c, [17] ज्ञात l [18] श्रीकण्ठ a
[19] काव्यादिकृत् b, काव्यातरोः a

वेदान्तार्थनिधिर्जनार्दनगुरोश्चूडामणेरात्मजः
शौचाचारपरः[1] समृद्धि[2]वितत[3]स्यानन्द[4] सन्दोहभृत्[5] ॥११॥

तत्प्रसादात्समालोच्य शिवशास्त्राणि यत्नतः।
सिद्धान्तशेखरं वक्ष्ये शिशुबुद्धिविवृद्धये ॥१२॥

नित्यं नैमित्तिकं काम्यं त्रिकाण्डं तत्र कथ्यते।
नित्यकाण्डे क्रमो यस्य[6] शौचादिर्दन्तधावनम्॥ ॥१३॥

स्नानं सन्ध्या नमस्कारस्तर्पणं सूर्यपूजनम्।
शिवार्चने[7] द्वारपूजा भूताद्याः पञ्चशुद्धयः ॥१४॥

शिवार्चनं तथा कुण्डसंस्कारः शिववह्निना।
तत्रेश्वरार्चनं होमो होमद्रव्यप्रमाणकम् ॥१५॥

होमशेष[8]विधानं च बलिकर्मविधानकम्[9]।
आगमार्चा गुरोःपूजा कपिलार्चनभोजने ॥१६॥

भिक्षाटनविधिश्चेति नित्यकाण्डे क्रमो मतः[10]।
नैमित्तिके पवित्रं स्यात्तत्र सूत्रविनिर्णयः ॥१७॥

अधिवासविधानं च पवित्रारोपणक्रमः।
दमनारोपणं पश्चाद्दीक्षा शिष्यादिनिर्णयः ॥१८॥

गुरुणां लक्षणं दीक्षाविभागानां विनिर्णयः।
षडध्वकीर्तनं चाथ शिष्याणा[11] मभिषेचनम्॥ ॥१९॥

---

[1] वरः f [2] समाधिविहितः h [3] विदित k [4] सानन्द c [5] सन्तोहभाक् b [6] यत्स्यात् a, यःस्यात् d [7] र्चनं e [8] होमकर्म e [9] विसर्जनम् l [10] क्रमोग्रतः l [11] गुरूणां e

साधकस्याभिषेकश्च प्रायश्चित्तविधिक्रमः।
अन्त्येष्टिः श्राद्धभेदः स्यादिति नैमित्तिकक्रमः ॥२०॥
काम्यकाण्डे प्रतिष्ठा स्यात्तद्भेदो भूपरीक्षणम्।
अथ वास्तु[1]प्रतिष्ठा स्याद्देशकालविचारणा ॥२१॥
अङ्कुरार्पणमार्गश्च कुण्डमण्डपलक्षणम्।
जलाधिवासमार्गश्च लिङ्गस्थापनलक्षणम्। ॥२२॥
परिवारप्रतिष्ठा च द्वार[2]संस्थापनक्रमः।
हृत्कुम्भस्य प्रतिष्ठा च तटाकस्य द्रुमस्य च ॥२३॥
प्रासादस्य प्रतिष्ठा च चूळिका[3]ध्वजयोरपि।
अथ सिद्धिविधानं स्यादिति काम्यविधिक्रमः[4] ॥२४॥

अथ नित्यकाण्डक्रमः

अथ नित्यविधिं वक्ष्ये शौचस्नानादिपूर्वकम्।
विनिद्रः प्रातरुत्थाय स्वाचान्तो[5] न्यासमाचरेत्[6] ॥२५॥
सुखासीनः[7] समाविष्टो रक्षितक्षः शिवं स्मरेत्[8]।
नामानि कीर्तयन् शम्भोर्निर्गत्य निजमन्दिरात् ॥२६॥
दक्षिणश्रवणाग्रस्थयज्ञसूत्रावृता[9]ननः।
दिवा सन्ध्यासु सौम्यास्यो निशि याम्यमुखो[10] भवेत् ॥२७॥

---

[1] पाद a [2] द्वारस्य h [3] शूलिका c [4] क्रमत् h [5] स्वस्वभे i [6] वासमाचरेत् f [7] सुखसन f
[8] स्मरन् d [9] सूत्रोदगा a [10] दक्षिणास्यो निशि व्रती e

तृण्छन्नमहीभागे मलमूत्रे समुत्सृजेत्।
गुरुदेवद्विजार्केन्दुभूतयत्यग्नि[1]योषिताम् ॥२८॥
न संमुखः पर्वताब्धिगर्तवर्त्मसुरालये।
वल्मीक[2]गोष्ठकाष्ठासु श्मशानाध्वाम्बुभस्मसु ॥२९॥
यज्ञवृक्षे गोमये च मलमूत्रे न सन्त्यजेत्।
अयज्ञिकैस्तृणैर्लोष्ठै[3]रपानं शोधयेद्बुधः ॥३०॥
न गोमयैर्नपाषाणैर्दारुभि[4]स्तं न शोधयेत्।
वस्त्रेणान्तरितं[5] शिश्नं वामेनादाय पाणिना ॥३१॥
शुद्धेतरे[6] करे मृत्स्नां शौचायालं समाहरेत्[7]।
श्मशानवर्त्मवल्मीकगोमयादि[8]जले स्थिताम् ॥३२॥
अन्यशौचावशिष्टादितुषाङ्गरावृतां[9] त्यजेत्।
नदीतीरे[10] शुचौ[11] मृत्स्नां निधायाभ्युक्ष्य वारिभीः ॥३३॥
दक्षपाणिपुटात्कृष्टैः प्रथमं शौधयेद्गुदम्।
धात्री[14]समानया यद्वा मृदा मुष्ट्यर्धमात्रया ॥३४॥
आदाय[15] दक्षहस्तेन वामपाणिनियुक्तया।
त्रिर्जलान्तरया[16] पायुं क्षालयेत्पञ्चसङ्ख्यया ॥३५॥
एकया क्षालयेच्छिश्नं दशभिर्वामहस्तकम्।
मृत्स्नाभिः सप्तभिर्हस्तैः परिमृज्यात्सिफचौ जलैः ॥३६॥

---

[1] वरः f [2] समाधिविहितः h [3] विदित k [4] सानन्द c [5] सन्तोहभाक् b [6] यत्स्यात् a, यःस्यात् d [7] चेनं e [8] होमकर्म e [9] विसर्जनम् l [10] क्रमोग्रतः l [11] गुरूणां e

एकैकया मृदा पदौ[1] हस्तौ पक्षाल्य चाचमेत्।
एतदेव[2] ग्रहस्थानां द्विगुणं ब्रह्मचारिणाम् ॥३७॥
त्रिगुणं निपिन[3]स्थानां यतीनां तु[4] चतुर्गुणम्।
शौचमेतद्दिवा[5] प्रोक्तं रात्रावुक्तार्धमाचरेत्॥ ॥३८॥
द्वित्रि[6]पादः समुद्दिष्टो[7] व्याधितानां तथा भवेत्।
चित्ताशुध्यवधि[8]र्यद्वा सर्वेषां शुद्धि[9]रीरिता ॥३९॥
एवं शौचं विनिर्वर्त्य विदध्याद्दन्तधावनम्।

अथ दन्तधावनविधिः

शिरीषनिम्ब[10]कारञ्जचिरिबिल्वैः सखादिरैः। ॥४०॥
समछेदार्द्रसच्त्वग्भिः समपर्वनिरामयैः[11]।
अष्टाङ्गुलसमायामैः कनिष्ठपरिणाहकैः ॥४१॥
कुर्युर्मुमुक्षवः शुद्धं दन्तानां दन्तधावनैः।
अशोकजम्बूककुभचूतप्लक्षातिमुक्तकैः ॥४२॥
सचम्पकैरपामार्गैर्द्वादशाङ्गुलसम्मितैः।
दन्तशुद्धिर्बुभुक्षूणामथवा जाति[12]पूर्वतः ॥४३॥
ब्रह्मक्षत्रियविट्शूद्रैः[13] शेषाणां दन्तधावनम्[14]।
एकैकाङ्गुलतो न्यूनं दशपर्वादितः[15] क्रमात् ॥४४॥

---

[1] पिण्डै h [2] एतच्छौचं i [3] तु वनस्थानां i [4] स्याच्चतुर्गुणम् h [5] दिवाशौचमिति k
[6] पाथि k [7] समदिष्टो h [8] शुद्धविधि i [9] विधि i [10] अर्जुन n [11] समपर्व h, समएव c
[12] चानु a वर्ण h [13] शूद्राः i [14] धावनैः d [15] दशभिर्वा a

धात्रीशिग्रु[1]धवैरण्डसीलु[2]वानीरसम्भवैः।
निम्बमूल[3]तृषक्षीरवृक्षैरङ्गुलिभिर्न तत् ॥४५॥
प्रतिपद्दर्शषष्ठीषु नवम्यामुक्तकाष्ठकैः।
न कुर्याद्दर्शषष्ठीषु नवम्यामुक्तकाष्ठकैः।
न कुर्याद्दन्तसंशुद्धिं[4] कुर्याद्वा पावनैर्दलैः ॥४६॥
व्यतीपते च सङ्क्रान्तौ न कुर्याद्दन्तधावनम्।
मुखं द्वादशगण्डूषैः शोधयेत्तदभावतः ॥४७॥
क्षालयित्वा मलं स्नायाच्छ्रोत्रनेत्रादिसम्भवम्।

अथ वारुणस्नानविधिः

तत्स्नानमष्टधाभिन्नं वारुणाग्नेयमारुतम् ॥४८॥
माहेन्द्र पार्थिवं मान्त्रं गोरजं मानसं भवेत्।
सरित्पतिसरित्सङ्गसरोनद[5]ह्रदादिषु[6] ॥४९॥
पल्वले प्लवने स्नानं भवेद्वारुणमुत्तमम्।
तटाकेऽनाकुले[7] स्नानं पुष्करिण्यां तु मध्यमम् ॥५०॥
कूपे वाप्युदपानादावधमं मन्दिरे तथा।
अस्त्रेण शुद्धभूभागं खात्वाष्टाङ्गुलतो[8] मृदम् ॥५१॥
त्यक्त्वा ततः समादाय मूलमन्त्रेण मृत्तिकाम्।
पूरयित्वा[9] मृदा[10] गर्तं हृदा तां मृदमाहरेत्। ॥५२॥

[1] शिग्वथ b [2] सेलु f, शेलु c [3] निम्बाकुलि n [4] शुद्धिं तु c [5] नदि e [6] नदा l
[7] नाकुले c, चोदके k [8] खात्वाङ्गुलमतो l [9] क्षालयित्वा a [10] पुनः b

निधाय[1] शिरसा[2] तीरे संसिच्यास्त्रेण[3] शोधशेत्।
शिखामन्त्रेण तत्रस्थं[4] तृणकेशादिकं[5] त्यजेत् ॥५३॥
कवचेन त्रिधा मृत्स्नां विभजेत्स्नानसिद्धये[6]।
पादादिनाभिपर्यन्तं भागेनालिप्य सेचयेत्। ॥५४॥
सप्तधा त्वस्त्रमन्त्रेण[7] जप्तया सर्वविग्रहम्।
मृदालिप्य निरुद्धाक्षः पाणिभ्यां प्राणसंयमैः[8] ॥५५॥
ज्वलदस्त्रं जले मग्नः[9] स्मर[10]न्नसिततेजसा।
उत्थाय पाथसो[11] मध्याद्दिवाकरमुदीक्षयेत् ॥५६॥
इत्थं कृत्वा मलस्नानं वैदिकं[12] च समाचरेत्।
द्विजो जलाद्विनिर्गत्य समाचम्य च वैदिकीम्[13] ॥५७॥
सन्ध्यां नमेत्ततः शैवीं शिवमेवापरं[14] नमत्
मलस्नानं विधायेत्थं विधिस्नानमथा[15] चरेत् ॥५८॥
तीर्थाधिदेवतां तस्मान्नाराचास्त्रविनिर्गताम्।
संहरे[16]द्द्वादशान्ते च वह्निना शोधये[17] ज्जलम् ॥५९॥
मूलमन्त्रामृतैः पूर्णं शिवतीर्थं तदादितः[18]।
सारस्वतादिकं तीर्थमाकृष्याङ्कुशमुद्रया ॥६०॥

---

[1] निधाय च c [2] नदी c [3] सञ्चिन्त्य सम्यकुशास्त्रेण d [4] मृत्स्नानं d
[5] क्रिमिदोषादिकं b [6] शुद्धये f [7] दीप्तशस्त्तेण c [8] प्राणनंयमैः d [9] माग्न a
[10] करं नासेत चेतसा a करं न्यासीत चेतसा l स्मरन्तासितचेतसा e [11] पयसो a
[12] विधिस्नान k [13] वैदिकम् e [14] शैवीमेवां परां a [15] स्नानं समा e [16] संहार a
[17] शोवयेत् h [18] तदीरितम् f [19] सरस्वत्यदिकं e [20] वह्निन c

हृदा संस्थापयेत्तोये तेनैवोद्भवमुद्रया।
आदाय मृत्तृतीयांशं मन्त्री[1] संहारमुद्रया ॥६१॥
नाभिप्रमाणतोयस्थो वामपादा[2]वुदङ्मुखः।
कवचेन त्रिधा कृत्वा भागांस्तानभिमन्त्रयेत्॥ ॥६२॥
एकधाङ्गै[3]र्दक्षभागं सप्तधास्त्रेण पूर्वकम्।
उत्तरस्थं मृदो भागं मूलेन दशधा जपेत्[4] ॥६३॥
अस्त्रजप्तमाथास्त्रेण दशदिक्षु विनिक्षिपेत्।
मूलाल्लब्धं[5] जले भागं मूलेन च भुजभ्रमात् ॥६४॥
विधाय भावयेत्तीर्थं शैवमेवं गृहेष्वपि।
अङ्गजप्तेन[6] सर्वाङ्गं चतुरङ्गै[7]र्विलेपयेत्। ॥६५॥
उत्तमाङ्गदिपादान्तं निर्मज्जेल्लिप्तविग्रहम्।
शम्भुं हृदम्बुजे ध्यायन्तिष्ठेत्तीर्थजलान्तरे ॥६६॥
शिवशक्तिस्वरूपाभ्यां कराभ्यां कुम्भमुद्रया।
वौषडन्तैः षड्भिरङ्गैः सिञ्चेन्मूलेन वा शिरः ॥६७॥
अस्त्रेणाम्बु स्वरक्षार्थं विघ्नौघस्य प्रशान्तये।
सर्वदिक्षु[8] विनिक्षिप्य स्नायादामलकादिभिः ॥६८॥
विनिर्गत्य जलात्तीरं[9] संहारिण्योपसंहरेत्।
अङ्गे सक्तं व्यपास्याम्बु[10] धौतवस्त्रे सितेऽथवा ॥६९॥

---

[1] मन्त्रसंहार l [2] वामबाणा a [3] एकयाङ्गैर्दिक्षु b [4] स्पृशेत् c [5] मूले लब्धं [6] लिम्पेन d [7] चतुरङ्ग f [8] पूर्वदिक्षु d [9] जलात्तीर्थं i [10] व्यपोह्याम्बु k [11] सितेतु वा सितेभुवा h

काषायं परिवर्तेत कौपीनं वा शमेच्छया[1]।
शिरोरोगाद्य[2]सामर्थ्यात्क्षालपेदागलां[3] तनुम् ॥७०॥
कण्ठस्नानमिदं प्रोक्तं द्विधैवं[4] वारुणं भवेत्।
धौतार्द्रवस्त्रसम्मार्गा[5]दङ्गानां[6] वारुणं तु वा ॥७१॥
काककङ्क कपोतोष्ट्रखरकुक्कुटगृध्रकैः।
ग्रामक्रोडा[7]दिभिः स्पृष्टस्तदङ्गाद्यैश्च वैकृतैः ॥७२॥
निर्माल्यभुक्श्वयानान्य[8]जातिभिः पतितैर्जनैः।[9]
उदक्या सूतकैः[10] प्रेतैः स्पृष्टो वारुणमाचरेत्[11] ॥७३॥
पर[12]विण्मूत्ररक्ताद्यैरूर्ध्वं नाभेः करौ[13] विना।
उपघाते जले[14] स्नायाच्छेषे[15] प्रक्षालनाच्छुचिः ॥७४॥

अथ आग्नेयस्नानम्

स्नानं वारुणमाख्यातमाग्नेयमधुनोच्यते।
आग्नेयं भस्मना कुर्याच्चतुर्धा भस्म भिद्यते ॥७५॥
कल्पाभिधानं प्रथमं द्वितीयमनुकल्पकम्।
उपकल्पं तृतीयं स्पादकल्पं स्याच्चतुर्थकम् ॥७६॥
पूर्वं पूर्वं विशेषं स्याद्वह्निगोमयभेदतः।
गृहित्वा गोमयं खस्थं पिण्डीकृत्य विशोषितम् ॥७७॥
शोधितं शिववह्नौ स्याद्दग्धं सद्यादिमन्त्रकैः।
मूलेन शोधितं भस्म कल्पाख्यं परिकीर्तितम् ॥७८॥

---

[1] वाश्रयेच्छया e [2] असूमध्यात् c [3] गलान्तकम् c [4] द्विविधं a, द्विजैर्वा k [5] सम्माज्या c [6] दजानां l [7] कोला l, कीला h [8] श्मशानान्त्य g [9] शुना i [10] सूतिकाद्यैस्तै c [11] वारुणं चरेत् l [12] वर m [13] करैर्विना n [14] जलैः k [15] शेषः h, शेषं i

अग्निहोत्रसमुद्भूतमथावा भस्म कल्पकम्।
अनुकल्पं वने शुष्कं शुद्धं दग्धं शिवाग्निना ॥७९॥
अटवीगृहगोवाटे जुष्टे[1] वाथेष्टकादिके।
वह्निना भस्ममन्त्रेण तत्रस्थं शोधितं क्रमात्[2] ॥८०॥
पिण्डीकृतं च गोमूत्रैः पुनर्दग्धं[3] शिवाग्निना।
उपकल्पाभिधानं[4] तत्तृतीयं भस्म कीर्तितम् ॥८१॥
भस्ममन्त्राद्विहीनं यदकल्पं स्याददूषितम्।
इत्थं चतुर्विधं भस्म तत्स्नानं वक्ष्यतेऽधुना ॥८२।
खड्गेन हुम्फडन्तेन विभूतिं सप्तधा जपेत्।
उद्धूलयेत्तथा देहं पादादामस्तकान्तकम् ॥८३॥
भस्मस्नानं भवेदेवं विधिस्नानेन[5] भस्मना।
षड्भिरङ्गैः प्रजप्तेन चास्यहृद्गुह्यविग्रहान् ॥८४॥
ईशाद्यैः पञ्चभिर्मन्त्रैः क्रमादुद्धूलयेबुधः।
विधिन्नानमिदं प्रोक्तं त्रिपुण्ड्रक्रम[6] उच्यते ॥८५॥
उद्धूलयेन्मुखं विप्रः सर्वतस्तच्छिवोदितम्[7]।
पार्थिवे[8] पट्टमुद्दिष्टं चतुरश्रं ललाटके ॥८६॥
वैश्ये च्यश्रं[9] च तत्पुण्ड्रं शूद्रे वृत्तं ललाटके।
मध्याङ्गुलिभिरादाय तिसृभिर्मूलमन्त्रतः[10] ॥८७॥

---

[1] दग्धं वा c मृष्टे वा e [2] यदा b, यथा c, [3] पूर्वदग्धं h [4] मन्त्रादिभिन्नं k [5] स्नाने तु a
[6] पुण्ड्रकं चोच्यते बुधः [7] तच्छिखादिकम् c [8] पार्थिवं e [9] तिस्रं च a [10] मान्त्रितम् b

ब्राह्मणो भस्मवेश्मस्थो[1] ललाटे हृदयेऽस्योः।
नामावुद्धूलयेत्तेषु देवानेतान् स्मरेत्क्रमात् ॥८८॥
शिवेश्वरौ रुद्रविष्णू ब्रह्मा पञ्चसु पञ्च तान्।
पञ्चाङ्गं पुण्ड्रमित्युक्तं वक्ष्येऽथाष्टाङ्गपुण्ड्रकम् ॥८९॥
शिरःफालगलांसेषु हृदि नाभौ च पृष्ठयोः[2]।
ब्रह्मा सरस्वती लक्ष्मीरुमेशौ सवितानलः ॥९०॥
शशीत्युदितमष्टाङ्गं षोडशाङ्गमथोच्यते[3]।
फाले कण्ठेऽसंयोर्बाह्वोः कूर्परद्वितये तथा ॥९१॥
कणिबन्धद्वये वक्षःकुक्षिनाभिषु पार्श्वयोः।
पृष्ठेऽथ देवताः शम्भुरीशो रुद्रो जनार्दनः ॥९२॥
ब्रह्मा वामादिनवकमश्विनौ षोडश[4] क्रमात्।
द्वात्रिंशत्सन्धिदेशेषु[5] त्रिपुण्ड्क्रम उच्यते ॥९३॥
शिरो फालगलक्षेषु नासामुखशिरोरुषु[6]।
अंसयोर्भुजयुग्मे च कूर्परद्वितये[7] ततः ॥९४॥
मणिबन्धद्वये वक्षनाभिमेढ्रगुदेषु च।
पृष्ठोरुजानुजङ्घाङ्घ्रिपादेष्वेतेषु देवताः ॥९५॥
मूर्तिविद्येशदिक्पालवस्वष्टकचतुष्टयम्।
द्वात्रिंशदाङ्गिकं[8] प्रोक्तं त्रितत्त्वेशं त्रिपुण्ड्रकम् ॥९६॥

---

[1] वेष्मस्थो h, वेश्मस्थे i, वेश्मस्था k [2] पृष्ठके n [3] मिहोच्यते a [4] देवताः b [5] भेदेषु c
[6] शिरोधिषु l, शिखादिषु k [7] तथा कूर्परकद्वयोः h [8] स्थानकं i

षडङ्गुलायतं विप्राः शेषे[1]ष्वङ्गुलहानितः।
यथासम्भवतः कुर्याद्देशकालाद्यपेक्षया ॥९७॥
उद्धूलनासमर्थो यः स[2] त्रिपुण्ड्रं यथोदितम्।
सन्ध्यात्रये[3] निशीथे च चर्यादौ[4] तद्द्वियामके[5] ॥९८॥
बिडाल[6]षण्डशूद्राणां[7] बकभूषिकयोषिताम्।
अन्येषां तद्विधानां च सम्पर्को जायते यदा ॥९९॥
सुप्त्वा भुक्त्वा पयःपीत्वा कृत्वा चावश्यकादिकम्।
आग्नेयमाचरेत्स्नानं निमित्तेष्वेषु सर्वदा ॥१००॥
विद्यागुर्व[8]ग्निदेवानां[9] समीपे दुष्टभूतले[10]।
दर्शने म्लेच्छजातीनां मार्गेणोद्धूलयेत्तदा ॥१०१॥

अथ माहेन्द्रस्नानविधिः

माहेन्द्रमधुना वक्ष्ये सम्पर्केऽर्कांशुवर्षयोः।
प्राङ्मुखः संस्मरन्नस्त्रमूर्ध्वयोः[11] पदसप्तकम् ॥१०२॥
मलस्नाने व्रजेदीशं स्मरेद्वैधे तथा प्लवे।
एवं माहेन्द्रमाख्यातं सर्वतीर्थफलप्रदम् ॥१०३॥
वायव्यं गोखुरोद्धूतरजोभिर्गोव्रजं गतः[12]।
स्मर[13]न्नस्त्रं मलस्नाने[14] तिष्ठेत्संरुद्ध[15]मारुतः ॥१०४॥

---

[1] शीर्षे e [2] य त्रिपुण्ड्रं तु k [3] द्वये e [4] वर्गादौ k [5] च द्विरामके k [6] विलाळ i, बिडौल h, विलाड n [7] नित्येष्वेतेषु k, [8] सहानां h [9] भावानां i [10] भूतकैः l [11] मूर्ध्वाधो e
[12] यतः c [13] व्रजन् a [14] जलस्नाने f [15] संशुद्ध c

पुरुषं तु विधिस्नाने पावनं परिकीर्तितम्।
गङ्गादितीर्थमृत्पिण्डैः[1] पर्थिवं स्नानमीरितम् ॥१०५॥
गुरुपादाम्बुजद्वन्द्वं शिरसा धारयेच्छुचिः।
संस्मरन् शिवमन्त्रं तद्गौरवं परिचक्षते ॥१०६॥
मन्त्रस्नानं प्रकुर्वीत शस्त्रब्रह्माङ्गशम्बरैः।
ध्यानेन प्राणरोधेन[2] मानसं मूलमन्त्रतः ॥१०७॥
देशं कालं स्वसामर्थ्यं विचार्य[3] स्नानसन्ततौ[4]।
एकेन केनचित्स्नातः सन्ध्यावन्दनमाचरेत् ॥१०८॥

अथ सन्ध्यावन्दनविधिः

सा सन्ध्या त्रिविधा प्रोत्येकं च पुनस्त्रिधा[5]।
ब्राह्मी च वैष्णवी रौद्री[6] प्रातर्मध्यान्तकादिषु[7] ॥१०९॥
प्रभुर्ज्ञानी[8] क्रिया चेति ब्राह्मी सा त्रिविधा स्मृता।
प्रातःकालेऽल्पनक्षत्रे सुबाला[9] मुक्तिदा[10] प्रभुः[11] ॥११०॥
भुक्तिमुक्तिप्रदा ज्ञानी मध्यबाला विमुक्तिदा[12]।
क्रिया मुक्तिप्रदा भानोरर्धमण्डलदर्शने[13] ॥१११॥
रक्तस्रग्वसना रक्ता रक्ता[14]लङ्कारशोभिता।
हंसासन[15]समासीना यज्ञसूत्रजटाधरा ॥११२॥

---

[1] संशुद्धैः i [2] योगेन l [3] विवाद्य h, विचार्य k [4] संयुतम् i [5] स्त्रयम् i [6] चैव e
[7] रौद्रीचैव विशेषतः i प्रातर्माध्याह्निकादिषु l [8] भृगुज्ञानीन्द्रियाचेति k, प्रभुज्ञानी मध्यवाला i [9] सुड्वाला c [10] भुक्तिदा h [11] भृगुः i, [12] विलुप्तभे e
[13] दर्शनात् h [14] माला i [15] संसवाहन k

चतुर्भुजा चतुर्वक्त्रा लोचनाष्टकभूषिता।
अक्षमालां स्रुवं[1] दक्षे वामे दण्डकमण्डलू ॥११३॥
दधानां संस्मरेत्सन्ध्यां ब्राह्मी तु त्रिविधा स्मृता।
द्वितीययामचातुर्थ्यभागे काले[2] त्रिभाजिते ॥११४॥
वाचा बागीश्वरी ज्वाला वैष्णवी त्रिविधा[3] भवेत्।
वाचा मुक्तिप्रदा पूर्वे भागे प्रथमयौवना ॥११५॥
सुवर्णपङ्कजासीनाः सितवस्त्रादिभूषणा।
वनमालोपवीताभ्यां भूषिता च[4] द्विलोचना ॥११६॥
वागीशी मध्यतरुणी मध्ये स्याद्भुक्तिमुक्तिदा।
ज्वाला स्यात्प्रौढयुवतिर्भुक्तिदा[5] प्रान्त भागके ॥११७॥
एकवक्त्रां चतुर्हस्तां दक्षिणे सगदाम्बुजाम्।
शङ्खचक्रधरां[6] वामे मध्याह्ने[7] वैष्णवीं समरेत् ॥११८॥
आरक्तार्ककरे[8] कालेऽर्धार्कास्तास्तमितारुणे[9]।
वामा ज्येष्ठा च रौद्रीति रौद्री सायं त्रिधा स्थिता[10] ॥११९॥
वामा मुक्तिप्रदा ज्ञेया किञ्चिच्चलितयौवना।
योवनार्धच्युता[11] भोगा ज्येष्ठा स्याद्भुक्तिमुक्तिदा॥ ॥१२०॥
गतयौवनसर्वस्वा रौद्री स्याद्भुक्तिदायिनी[12]।
वृषपङ्कजमध्यस्था गजचर्मविभूषिता ॥१२१॥

---

[1] स्रजं [2] कालविभाजिते i [3] ति त्रिधा h [4] सा तं i [5] मुक्तिदा e [6] गदा c [7] सन्ध्या वै i [8] परे h [9] अऽर्धारतार्केऽस्तमितारुणे k [10] स्मृता 1 [11] नार्धाच्चयुता c, [12] दान्तिमा a, दम्बिका i

स्वारिवारिदश्यामा शार्दूलाजिनसंयुता[1]।
सार्धचन्द्रजटाजूटा[2] त्रिणेत्रा च चतुर्भुज। ॥१२२॥
त्रिशूलाक्षधम दक्षे वामें साभयशक्तिका।
एकास्या सत्रिनयना[3] सायंसन्ध्या त्रिधा[4] स्मरेत् ॥१२३॥
इत्थं नवविधाः सन्ध्यास्तच्छास्त्रे शम्भुभाषिताः।
साक्षीभूताः समस्तस्य पूजिताः सर्वसिद्धिदाः[5] ॥१२४॥
अपूजिता विघ्नकरास्तस्मात्ताः प्रणमेद्बुधः।
सन्ध्यामण्डलसङ्घाते कलानां[6] स्वतनुं[7] स्मरेत्। ॥१२५॥
सन्ध्यावन्दनमेतद्धि शिष्टाः शुद्धिकराः[8] क्रियाः[9]।
सन्ध्याचतुष्टयं वक्ष्ये योगिनरं परमं मतम् ॥१२६॥
एकैकोपाधिना[10] याति शिवशक्तिरनेकताम्।
रजःसत्वतमोयुक्ता रक्ताः शुक्लासिताः क्रमात्॥ ॥१२७॥
मृणालसूत्रवत्सूक्ष्मा हृद्बिन्दुब्रह्मरन्ध्रगाः[11]।
सवेरिन्दोर्द्वयोश्चान्ते[12] तिस्रः सन्ध्याः स्थिताः क्रमात् ॥१२८॥
धारणध्यानसंयुक्ताः स्मरेयुः प्राणयोगिनः।
परमः[13] शिवबोधो[14] यः सा सन्ध्या निर्गुणा परा[15] ॥१२९॥
परतत्त्वस्थिता नित्यं तत्तत्त्वं परमं पदम्[16]।
इत्थं सन्ध्याविधिं ज्ञात्वा सन्ध्यावन्दनमाचरेत् ॥१३०॥

---

[1] वाससः l [2] चूडा [3] त्रित्रिधारे f नागभूषा च b [4] तदा h [5] सिद्धिदाः सदा i [6] बलिनं k [7] स्वां तनुं i [8] तराः k, करी h [9] कराः i [10] नोपाधिना h [11] मध्यामा c [12] ध्र्वान्ते d [13] परमं i [14] वोधाय n [15] वरा n [16] मतम् m.

सन्ध्याज्ञान[1]विहीनानां कर्म नित्यादि निष्फलम्।
दक्षपाणितलस्थं स्यादाग्नेयं तीर्थमुत्तमम् ॥१३१॥
अग्रेऽङ्गुलीनां दैवं[2] स्पाहाह्ममङ्गुष्ठमूलकम्।
पित्र्यं स्यात्तर्जनीमूले कनिष्ठामूलसंस्थिताम् ॥१३२॥
प्राजापत्यमृषीणां तु समस्ताङ्गुलिसन्धिगम्[3]।
वामपाणितले सौम्यं भौमं[4] करभमूलतः ॥१३३॥
तीर्थान्येतानि विदुषां निवसन्ति करान्तरे।
शिखा बध्वा तु शिखया चोपविष्टस्तटे[5] शुचौ[6] ॥१३४॥
वामुपादं जले कृत्वा स्थले कृत्वा तु दक्षिणम्।
पूर्वास्यश्चोत्तरास्यो वा जानुमध्यकरद्वयः ॥१३५॥
फेनबुद्बुदकीटादिरहितं वारि निर्मलंम्।
दक्षपाणिपुटे कृत्वा मुक्तवाङ्गुष्ठकनिष्ठिके ॥१३६॥
मोमरूपं सिते पक्षे कृष्णे त्वर्कात्मकं स्मरेत्।
आत्मविद्याशिवैस्तत्वैः स्वधान्तैः[7] प्रणवादिकैः ॥१३७॥
हृच्छिरच्छूलिकाबीजसहितै[8]श्चुलुकत्रयम्
प्रपिबेह्हह्मतीर्थेन ब्रह्मविष्णुहरप्रियम् ॥१३८॥
ओष्ठावङ्गुष्ठमूलेन द्विः प्रमुज्यास्त्रवारिणा।
मध्याङ्गुलित्रयेणोष्ठौ संस्पृशेद्धृदयाणुना ॥१३९॥

---

[1] काल h [2] अग्रेणाङ्गुलिनां देवं k [3] संज्ञिकम् f [4] हौतं b [5] चोपवीतः i [6] शुभौ h
[7] तत्त्वान्तैः d [8] सलिलैः i

अग्रेणाङ्गुष्ठतर्जन्योर्नासिकायुगलं स्पृशेत्।
अङ्गुष्ठानामिकाग्रेण नेत्रे श्रोत्रे जलान्तरम् ॥१४०॥
कनिष्ठाङ्गुष्ठयुग्मेन नाभिदेशं स्पृशेत्तथा।
वक्षः करतलेनैव समस्ताङ्गुलिभिः शिरः ॥१४१॥
अंसौ[1] च संस्पृशेत्साम्बुदक्षवामक्रमेण तु।
आस्यं सरस्वतीस्थानं नासायामनिलस्थितिः ॥१४२॥
नेत्रे मित्राश्रिते प्रोक्ते श्रोत्रे कण्ठाश्रिते मते[2]।
नाभौ प्रजापतिर्ब्रह्मा हृदि[3] मूर्धनि केशवः ॥१४३॥
दस्रावंसाश्रयौ[4] स्यातामेतानाचमने स्मरेत्।
वैदिकीं[5] तु पुरा कृत्वा ततः शैवीं समाचरेत् ॥१४४॥
कृतहस्ताङ्ग[6]विन्यासो वीक्षणादिविशोधितैः।
आत्मानं मस्तके सिञ्चेदम्बुभिः कुम्भमुद्रया ॥१४५॥
वैषडन्तैः षड्भिरङ्गैः संहिताशम्बरैस्तु वा।
संहितां मनसा ध्यायन्[8] त्रिर्जपेन्नियतानिलः[9] ॥१४६॥
प्राणायामो भवेदेषः सर्वकर्मसु चोदितः।
वामपाणितले तोयं[10] सौम्यतीर्थं निधाय तत् ॥१४७॥
हृदाभिमन्त्रितं कृत्वा तत्तीर्थं गालिताम्बुभिः।
मार्जनं संहितामन्त्रैराचरेद्दक्षपाणिना ॥१४८॥

---

[1] अस्त्रेण i [2] समे c [3] हृदयादीनि a [4] दशावसन्निभं n [5] वैदिकं k [6] अञ्जलि i
[7] संहितैः l [8] मन्त्री n [9] नि वः m [10] तीर्थं c

वामपाणितलस्थं तत्कृत्वा दक्षकरोदरे।
नासासमीपमानीय धर्मरूपं सितं[1] स्मरेत् ॥१४९॥
पूरकेणेडयाकृष्य[2] धारयेदिन्दु[3]मण्डले।
कुम्भकेनाथ सर्वाङ्गं व्यापकं[4] पापसञ्चयम्[5] ॥१५०॥
दक्षनाड्याञ्जनाभास[6]मारेच्यादाय[7] दक्षिणे।
पाणौ पापं वज्रशिलायां क्रोधतश्चैव निक्षिपेत्। ॥१५१॥
शतधाग्नेयतीर्थेन स्पादेतदघमर्षणम्।
आचम्य सकलीकृत्य रक्षपुष्पाक्षतादिभिः ॥१५२॥
प्रदद्याच्छिवसूर्याय मूलेनार्घ्यत्रयं जलैः।
जपेत्त्रिणेत्रगायत्रीं प्रातः प्राग्वदनस्थितः ॥१५३॥
उपविष्ट उदग्वक्त्रो मध्याह्ने जपमाचरेत्।
प्रत्यङ्मुखः समासीनः सायं सन्ध्यां नमेद्बुधः ॥१४४॥
सन्ध्याविधिः समाख्यातस्तर्पणं प्रोच्यतेऽधुना।

अथ तर्पणविधिः

शिवं ब्रह्माणि चाङ्गानि देवतीर्थेन तर्पयेत्। ॥१५५॥
स्वाहान्तमुपवीती च स्यादेतद्देवतर्पणम्।
ब्रह्मा विष्णुर्मृडो[8] रुद्र ईश्वरश्च सदाशिवः ॥१५६॥
आदित्यरुद्रवसवा विश्वेदेवाः समाध्यगाः।
मरुद्गणाश्च भृग्वाद्या देवा एते प्रकीर्तिताः ॥१५७॥

---

[1] स्थितं e [2] द्विराकृष्य l [3] येद्विन्दु i [4] वाचकं i [5] पावनं च यः b [6] कृष्णाञ्जलाभासा a
[7] मारोप्यादाय l [8] रथो i

कण्ठस्थयज्ञसूत्रोऽथ[1] नमोन्तं[2] ऋषितीर्थतः।
तर्पयेद्दषिसंज्ञातं[3] विश्वामित्रादि[4] पूर्वकम् ॥१५८॥
पुलस्त्यश्च क्रतुश्चाथ वसिष्ठः समरीचकः।
जमदग्निर्भरद्वाजः कश्यपाद्याः महर्षयः ॥१५९॥
कण्ठाङ्गुष्ठयुगासक्तयज्ञसूत्रोऽथ मानुषान्।
प्राजापत्येन तीर्थेन वौषडन्तं प्रतर्पयेत्[5] ॥१६०॥
सनकश्च सनन्दश्च तृतीयश्च सनातनः।
सनत्कुमारकपिलौ प्रभुपञ्च[6]शिखा अपि ॥१६१॥
मनुष्याधीश्वरा एते मनुष्याः परिकीर्तिताः।
हस्तयुग्मादधःकृत्वा कण्ठस्थं यज्ञसूत्रकम् ॥१६२॥
वौषडन्तानि भूतानि भूततीर्थेन तर्पयेत्।
आकाशानिलतेजांसि भूतानि स्युर्जलं महीम् ॥१६३॥
प्राचीनावीतवान् पौत्रं समादाय स्वधान्तकम्।
तर्पयेत्पितृतीर्थेन त्रिपित्राद्याश्च मातरः ॥१६४॥
सोमश्च पितृमान् पूर्वमङ्गिरश्चान्त्य[8]मित्यथ।
सकव्यवाहनोऽपि स्यादग्निष्वात्तादिकाः परे ॥१६५॥
इत्येते देवपितरः स्वपित्राद्याश्च मातरः।
पितामहादिका[9]श्चैव तथा मातामहादिकाः ॥१६६॥

---

[1] सूत्रेण l [2] नमेन i, नमसा h [3] सङ्ख्यातं k [4] मित्रोत्रि q [5] प्रवर्तयेत् d, प्रकल्पयेत् c [6] प्रभूसं च, i भृगुपञ्च c [7] तिलैरन्यूनचाक्षायं d तीर्थैरन्यानथाक्षथौः l [8] अङ्गिरस्याश्च, b अङ्गिरश्चान्त्यमेप्यथ h अङ्गारश्चोगत् l मोप्यथ k [9] मह्यादिका n

एबं तर्पणमाख्यातं देवर्षिमनुजादिकम्[1]।
अर्कायाघ्र्यत्रयं दत्त्वा तर्पये[2]त्तीर्थमम्भसा ॥१६७॥
आचम्य सकलीकृत्य पुष्पादिकमथाहरेत् ॥१३८॥
श्रीकृष्णशैवागमचक्रवर्तिनां[3]
शिष्येण शैवागमतत्ववेदिना।
श्रीविश्वनाथेन सदाहिताग्निना
शौचादि[4]सन्ध्याविधिरेषभाषितः ॥१६९॥

इति श्रीशुद्धशैवागमाचार्य श्रीकृष्ण[5]योगीन्द्रशिष्येणोभयवेदान्ति
भास्करसूनुना कृताग्निष्टोमेन विश्वनाथेन विरचिते
सिद्धान्तशेखरे नित्यकण्डे शौचादिविधानं[6]
नाम प्रथमः परिच्छेदः

अथ सूर्यपूजा विधिः

अथातः शिवसूर्यस्य प्रोच्यतेऽपचितिक्रमः।
कुर्यात्कराङ्गविन्यासं समूलैरङ्गशम्बरैः ॥१॥
विधाय देह[7] संशुद्धिं मूलशम्बरभावतः।
भावयेद्ध्यानुरूपेण स्वात्मानं भास्करं[8] परम् ॥२॥
जपापुष्पोपमैस्तोयैर्बिन्दुभूत[9]स्वधो[10]पमैः।
पूजयित्वा समभ्यर्च्य तदङ्गैरर्घ्यपात्रकम् ॥३॥

---
[1] पितृमानुषम् l [2] संहरे a [3] वर्तिगा e [4] शैवादि e [5] कृष्णपिण्डत i [6] धिधानो d
[7] तनु d [8] भास्वरं e [9] द्रुतं i, द्युति c [10] सुधो d

अस्त्रमन्त्रेण संरक्ष्य[1] कवचेनावकुण्ठयेत्।
तत्तोयैर्द्रव्यसंशुद्धिं विधाय प्राङ्मुखो यजेत्। ॥४॥
गौराङ्गं दण्डिनं[2] स्थूलं लम्बकूर्चं महोदरम्।
मषिपात्र[3]धरं वामे दक्षे लेखनिकाधरम् ॥५॥
पिङ्गङ्गं पिङ्गलं वामे वाहनं सूत्रिकाधरम्[4]
दक्षे दण्डधरं द्वारवामशाखाग्रगं यजेत् ॥६॥
एकास्यं त्र्यम्बकं[5] भानोर्दक्षशाखा[6]गतं यजेत्।
गणेशमीशकोणस्थमाग्नेय्यां च गुरुं यजेत् ॥७॥
प्रभूतासनकं मध्ये सितभस्म[7] विभूषितम्।
कोणेषु विमलं सारमाराध्यं[8] पावकादिषु[9] ॥८॥
पूजयेत्परमं[10] सौख्यं[11] सिंहाकारधरानिमान्।[12]
पादपीठधरान् श्वेतरक्तपीतासितप्रभान्। ॥९॥
तन्मध्ये धवलं पद्मं यजेदम्बुजमुद्रया।
दीप्ता सूक्ष्मा जया भद्रा विभूतिर्विमला तथा ॥१०॥
अमोघा विद्युता चेति नवमी सर्वतोमुखी।
दाडिमीपुष्पसंकाशाः सर्वाभरणभूषिताः ॥११॥
एकवक्त्रा द्विनेत्राश्च वामे वारिजपाणयः।
उद्धृतचामरा दक्षे पूर्वादीशान्तपत्रगाः ॥१२॥

---

[1] सम्प्रोक्ष्य k [2] दाडिनं l [3] मक्षपात्र n [4] गृहं h गत i [5] स्तवकं f [6] दशशाखा b
[7] सितपद्म d [8] आरोग्यं d [9] परमण्डुखम् e [10] सिंहाकारानं धरान् धीमान् पावकादिषु पूजयेत् l, [11] साराख्यं, i सारान् c [12] कारानिमान्यजेत् n

अष्टौ प्रपूजयेच्छक्तीर्नवर्मी कर्णिकान्तरे।
विस्फुरां दर्शयेदाशु[1] शिवसूर्यासनं यजेत् ॥१३॥
चण्डांशुं पुण्डरीकस्थं दाडिमीकुसु मप्रभम्।
चण्डत्त्विण्मण्डलोद्दण्ड[2]मेकतुण्डं द्विलोचनम् ॥१४॥
किरीटमण्डलधरं[3] भास्वत्कुण्डलमण्डितम्।
अंसासंसक्तसम्फुल्लसुश्वेतकमलद्वयम् ॥१५॥
दधानं हस्तयुग्मेन सूर्यदेहं[4] विचिन्तयेत्।
रक्तबिन्दूपमं सूर्यं तेजोरूपं सुनिर्मलम् ॥१६॥
बिन्दुमध्याद्विनिर्गत्य पुष्पाञ्जलिगतं स्मरेत्।
आवाहनं स्थापनं च सान्निध्यं सन्निरोधनम् ॥१७॥
अर्घ्यं न्यासादिकं कुर्यान्मुद्राभिः शम्बहे रवेः
दत्त्वा पाद्यादिकं स्नानं रक्तपुष्पादिभिर्यजेत् ॥१८॥
दर्शयेत्पद्म[5]बिम्बे च ध्यानमुद्रां[6] विवस्वते।
यजेदङ्गानि रक्तानि प्रसन्नानि विभूषणैः ॥१९॥
भूषितानि द्विनेत्राणि वरदाब्जकराणि च।
कोणेष्वङ्गानि चत्वारि वह्न्याशादीनि[7] भास्वता ॥२०॥
अस्त्रं ज्वालाकुलं पिङ्गं खड्गखेटकरा[8]म्बुजम्।
दंष्ट्राभ्रुकुटिभीमास्यं चतुर्दिक्पत्रकं[9] यजेत् ॥२१॥

---

[1] भानु l [2] चण्डद्विमण्डलोद्दण्ड i खण्डत्पिण्डलकोद्दण्ड h [3] मण्डनधरं k [4] सूर्यदेवं e [5] त्वथ c [6] ध्याने मुहे, e ध्याने मन्द्रे, n ध्यानरुद्रे l [7] वह्न्याशादीनि m व्न्याशब्दनिभं स्वतः, n वह्नीशेति नभस्वताम् c [8] गदा k [9] दिग्वप्रकं l

ग्रहणां निकरं बाह्ये रवेरावरणं यजेत्।
सौम्यगात्रं सितं सौम्यं दक्षिणे राक्ष[1]सूत्रकम् ॥२२॥
वामे पीयूषकलशं दधानं पूर्वतोर्चयेत्।
बुधं हैमनिभं[2] बालं दक्षिणे वरहस्तकम्[3] ॥२३॥
धनुर्दण्डधरं वामे दक्षिणाशागतं यजेत्।
गोरोचनसमाकारं सुराचार्यं च पश्चिमे ॥२४॥
दक्षेऽक्षसूत्रिणं वामे कमण्डलुधरं यजेत्।
शक्रमेकदृशं[4] श्वेतमक्षमालां कमण्डलम्। ॥२५॥
दधानं दक्षिणे वामे कुबेरककुभाश्रितम्[5]।
रक्ताङ्गं मङ्गलं पीनं दक्षिणे चाक्षसूत्रकम्[6] ॥२६॥
वामे शक्तिधरं रक्तभूषणं वह्निकोणगम्।
श्यां शनैश्चरं पङ्गुं दक्षिणे साक्षसूत्रकम्[7] ॥२७॥
शक्तयायुधधरं वामे यजेन्निर्ऋतिकोणगम्।
राहुं रक्ततनुं दक्षे सासिं[8] वामे[9] समुद्गरम्[10] ॥२८॥
वायव्यकोणपत्रस्थमर्धदेहं प्रपूजयेत्।
धूमाभं त्रिफणं[11] केतुं दक्षिणे खड्गहस्तकम् ॥२९॥
वामे दीपधरं मर्त्यं नागाङ्गं[12] रुद्रकोणगम्।
सर्वे वा साभया दक्षे वामाङ्कन्यस्तहस्तकाः ॥३०॥

---

[1] चाब्ज f [2] भस्मनिभं b [3] वाणहस्तकम् l बालवस्त्रकम् a [4] दक्षिणगं k दक्षदृशं h [5] तनुभाश्रयम् i [6] साक्षसूत्रकम् c [7] नाक्षसूत्रकम् e [8] साक्षं l [9] चर्म n [10] समुद्गकम् k [11] कृपणं l [12] नाराङ्ग l

एकास्या द्विभुजाः कामरूपा दिव्याम्वरा ग्रहाः।
एवं ग्रहान्समभ्यर्च्य धूपदीपवलीनथ[1] ॥३१॥
ताम्बूलादिपवित्रान्तं दद्यात्सूर्याय भक्तितः।
ग्रहाङ्गसङ्गयुक्तोऽयं[2] जपं कृत्वा निवेदयेत् ॥३२॥
स्तुत्वा स्तौत्रैः प्रणम्यार्कं दत्वार्घ्यं च पराङ्मुखम्।
विसृज्य सग्रहं[3] भानुं हृदम्भोजे नियोजयेत् ॥३३॥
तेजश्चण्डं समभ्यर्च्य[4] निर्माल्यं च ततोर्चयेत्[5]।
यजनं शिवसूर्यस्य विश्वनाथेन चोदितम् ॥३४॥

अथ शिवार्चनम्

यक्ष्ये शिवार्चनं पुण्यं भुक्तिमुक्तिफलप्रदम्।
शिवार्चनं तु द्विविधं परार्थस्वार्थभेदतः ॥३५॥
परार्थं ब्राह्मणाः कुर्युर्दीक्षिता यजनं प्रभोः।
सर्वे स्वार्थं प्रकुर्वीरन् दीक्षिता ब्राह्मणादयः। ॥३६॥
अदीक्षितश्चतुर्वेदी न स्पृशेन्नापि चार्चयेत्।
भुभुक्षुर्वा मुमुक्षर्वा समयी पुत्रकोऽपि वा ॥३७॥
आचार्यः साधको देवं पूजयेत्स्वार्थसिद्धये।
यजनं च द्विधा ज्ञेयं बाह्याभ्यन्तरभेदतः ॥३८॥
प्रथमं तुद्बुभुक्षूणां यतीनामन्तरर्चनम्[6]।
सर्वेषां वा बहिर्यागः तत्स्वरूपं निरूपयते ॥३९॥

---

[1] बलिं तथा c [2] युक्ताय d [3] सद्व्हं c [4] ततोऽभ्यचर्य k [5] विसर्जयेत् h पवित्रकम् i
[6] मानसाचनम् c

ग्रामादौ स्थापिते लिङ्गे यद्वा देवादिनिर्मिते।
परार्थयजनं कुर्यात्सर्वप्राणिहितावहम् ॥४०॥
स्वार्थं दीक्षोत्तरे[1] काले गुरुदत्ते स्वलिङ्गके।
यजनं स्वार्थसिध्यर्थमेवं स्वार्थमुदाहृतम् ॥४१॥
उत्तमं मध्यमं नीचं यजनं तत्पुनस्त्रिधा[2]।
प्रत्येकं त्रिविधं चोति नवधा कालभेदतः ॥४२॥
अष्टयामेषु यजनमुत्तमोत्तममुच्यते[3]।
प्रातरारभ्य योमेषु सप्तसूत्तममध्यमम् ॥४३॥
उत्तममाधममित्युक्तं षट्सु योमेषु पूजनम्।
पञ्चयामार्चनं[4] ज्ञेयं मध्यमोत्तममागमे[5] ॥४४॥
प्रातर्मध्यन्दिने[6] सायं निशीथे मध्यमध्यमम्।
प्रातर्मध्यन्दिने सायं यजनं मध्यमाधमम् ॥४५॥
प्रातःकाले च रात्र्यादौ यजनं ह्यधमोत्तमम्।
कनिष्टमध्यमं ज्ञेयं प्रातःकाले शिवार्चनम् ॥४६॥
यथासम्भवाकाले स्याद्यजनं ह्यधमाधमम्।
इति कालविभेदेन नवधा यजनं प्रभोः ॥४७॥
पूजाभेदेन यजनं पञ्चधा परिकीर्तितम्।
आराधनार्चने पूजा योगोऽर्हा चेति[7] पञ्चधा ॥४८॥

---

[1] र्थं दीक्षेपरे e [2] तत्त्रिधामतम्, h तत्त्वतस्त्रिधा k [3] मिष्यते c [4] पञ्चयामेषु यजनं l [5] भागके c [6] प्रातर्मध्याह्नसायाह्ननिशीथे मध्यमध्यमम् l [7] भोगोऽर्हा चोति f

आराधनं तु दीपान्तं यतीनां मुक्तिदायकम्।
अर्चनं स्पाद्धविष्यान्तं बुभुक्षोर्भुक्ति[1]दायकम् ॥४९॥
पूजोत्सवान्ता विज्ञेया ग्रामादौ सर्वसौख्यदा।
यागो[2] वृत्तान्तको ज्ञेयो राजराष्ट्रसमृद्धिकृत् ॥५०॥
विप्रभोजनपर्यन्ता स्यादर्हा सर्वशान्तिदा।
इत्थं पञ्चविधं प्रोक्तमुपचारप्रभेदतः ॥५१॥
पूजां षोडशधा प्राहुरन्ये कालविभेदतः।
मुहूर्तद्वितयं तत्र कालस्तस्मिन् शिवं यजेत्। ॥५२॥
द्वात्रिंश[3]त्कालभेदेषु केचित्पूजां प्रचक्षते।
कालस्तत्र मुहूर्तः स्याद्यजेत्प्रतिमुहूर्तके[4] ॥५३॥
सम्पदाधिक्यतो ज्ञेयः सर्वमेतत्परार्थके[5]
स्वार्थं यथोचितं कुर्यान्नियतं नोत्सवादिकम् ॥५४॥
कालभेदेषु सर्वेषु पूजा तत्कालसम्पता।
तत्कालन्यूनतो वापि पूजां[6] नोत्तर[7] कालके ॥५५॥
स्नान[8]सन्ध्यादिनियमं[9] कुर्यात्प्रागेव कालतः।
कर्तृकालक्रियाभेदा इति प्रोक्तः शिवार्चने ॥५६॥
विधानं शिवपूजायाः कथ्यतेऽथ[10] यथाक्रमम्।
समाचान्तः कृतन्यासः[11] प्राणायामत्रयान्वितः ॥५७॥

---

[1] मुक्ति i [2] भोगो e [3] द्वाविंश c [4] मुहूर्तकम् e [5] परार्थकम् b [6] पूजा f [7] नोत्तम l
[8] स्नानं i [9] नियमः k [10] प्रोक्तं k [11] यद्यथा n [12] कृतस्नानः d

सङ्कल्पपूर्वकं कुर्यात्सामान्यार्घ्यं यथोचितम्।
यागगेहस्य पूर्वादिदिक्षु द्वाराणि पूजयेत् ॥५८॥
यद्वा द्वाराणि सञ्छाद्य[1] पूर्वदक्षोत्तराणि च।
पश्चिमे[2] पूजयेन्नित्यं[3] सर्वाण्य[4]न्यत्र पूजयेत्। ॥५९॥
प्रविश्य[5] पश्चिमद्वारे नित्यनैमित्तिकादिषु।
द्वारमस्त्राम्बुना प्रोक्ष्य पश्चिमे[6] तत्प्रपूजयेत्[7] ॥६०॥
गणपो भारती लक्ष्मीर्नन्दी गङ्गा च[8] पञ्चमी।
महाकालोऽथ यमुना प्रोच्यन्ते द्वारपा यथा ॥६१॥
श्यामं लम्बोदरं स्थूलं गजवक्त्रं चतुर्भुजम्।
दन्तं दक्षेऽक्षमालां च वामे परशुलड्डुकौ ॥६२॥
दधानं वामनं त्र्यक्षं गणेशं विघ्ननायकम्[9]।
ध्यात्वा सम्पूजयेद्द्वारस्योर्ध्वोदुम्बरदक्षिणे ॥६३॥
श्वेतां सरस्वतीं बालां सिताम्बरविभूषिताम्।
त्रिणेत्रामेकवदनां चतुर्बाहुविभूषिताम् ॥६४॥
दक्षवामकराम्भोजवीणावादनतत्पराम्।
अक्षसूत्रं पुस्तकं च दधानां ज्ञानसिद्धिदाम् ॥६५॥
ऊर्ध्वोदुम्बरवामस्थां द्वारस्याथ[10] प्रपूजयेत्।
मध्ये तयोर्महालक्ष्मीं स्वर्णवर्णां विभूषिताम् ॥६६॥

---

[1] सञ्चिन्त्य a [2] पश्चिमं e [3] नित्ये n [4] द्वाराणि m [5] प्रवेशः c [6] पश्चिमं e
[7] तत्पतीन्यजेत् l [8] भृङ्ग च i [9] वारकम् a [10] स्थाधः l

गजहस्तस्थभृङ्गारसुधाधाराभिषेचिनीम्।
द्विनेत्रामेकवदनां चतुर्बाहुविभूषिताम्[1] ॥६७॥
श्रीफलाक्षधरां[2] दक्षे वामे साब्जभयां[3] यजेत्।
युवानं नन्दिनं रक्तं त्रिणेत्रं चन्द्रभूषणम् ॥६८॥
जटायज्ञोपवीताढ्यं सर्वज्ञं शान्तचेतसम्[4]।
कटिवक्त्रं चतुर्बाहुं दक्षे शूलाक्षसूत्रकम् ॥६९॥
वराभयान्वितं वामे यद्वा पाश[5]गदाधरम्।
दक्षिणे वामतः शूलं तर्जनीसंयुतं तथा[6] ॥७०॥
द्विभुजं साक्षसूत्रं[7] वा दक्षशाखागतं यजेत्।
कुन्देन्दुधवलां गङ्गां सिताम्बरविभूषणाम् ॥७१॥
श्वेतचामरपीयूषकुम्भासक्तकराम्बुजाम्।
त्र्यम्बका[8]मेकवदनां मकराम्भोजसंस्थिताम् ॥७२॥
[9]ससुधाकुम्भापद्माभां[10] ध्यात्वा नद्युत्तरे[11] यजेत्।
महाकालं महादंष्ट्रं कृष्णपिङ्गजटाधरम् ॥७३॥
भ्रुकुटीभीषणं पीनं नागयज्ञोपवीतिनम्।
दक्षे कपालं खट्वाङ्गं वामे सर्पं च दुन्दुभिम् ॥७४॥
यद्वा त्रिशूलं डमरुं गदां खट्वाङ्गकं तथा।
दधानं द्विभूजं वाथ सत्रिशूलकपालकम् ॥७५॥

---

[1] भूतिदाम् l [2] लाब्जकरां h [3] नाब्जभयां k [4] चेतनम् h, तेजसम् i [5] पशु c [6] दधौ e
[7] शूलं च f [8] व्यम्बका h [9] संसुधा i [10] पद्मां l [11] नद्मन्तरे n

द्वारस्योत्तरशाखायामेकास्यं त्र्यम्बकं यजेत्।
कालिन्दीं कज्जलाभासां कच्छपाम्भोजसंस्थिताम् ॥७६॥
कृष्णाम्बरविभूषाढ्यामेकवक्त्रां द्विलोचनाम्।
सचामरसुधाकुम्भां कुम्भाम्बुजधारां[1] तु वा ॥७७॥
सर्वकामप्रदां सौम्यां पूजयेद्द्वारवामतः।
विमलं च सुबाहुं च यजेद्द्वारकवाटयोः ॥७८॥
एतेषामासनं दत्त्वा मूर्तिं ध्यात्वा यथोदिताम्।
आवाह्य स्थाप्य सान्निध्यं कृत्वैतान् सन्निरोधयेत् ॥७९॥
पाद्यमाचमनं चार्घ्यं[2] गन्धपुष्पादिकं तथा।
दत्त्वा कृताञ्जलिर्भूत्वा शैवाज्ञां श्रावयेद्यथा ॥८०॥
द्वारपा देवदेवस्य द्वारं रक्षत[3] यत्नतः।
निवार्य विघ्नसङ्घातमित्याज्ञा पारमेश्वरी ॥८१॥
अस्त्रेणोद्घाटये[4]न्मन्त्री कवाटद्वितयं ततः।
ततोऽतिगुप्तं विजनं[5] विकीर्णकुसुमाकुलम् ॥८२॥
सुधूपामोदगन्धाढ्यं चर्चितं[6] चन्दनादिभिः।
वितानोपरिसञ्छन्न[7]दर्पणांशुप्र[8]पूरितम् ॥८३॥
कुङ्कुमोदकसंयुक्तं[9] कर्पूरक्षोदधूसरम्।
नानारत्नसमाकीर्णं पुष्पमालावलम्बितम् ॥८४॥

---

[1] वरां e [2] नीयार्घ्यं i [3] सक्षन्तु a [4] णोत्पाटयेत् e [5] यजनं i [6] अर्चितं h [7] सञ्छिन्न f
[8] दर्पणं सुप्र b [9] संसिक्तं

शाम्भवं भवनं दिव्यं[1] यथा[2] दृष्ट्या विलोकयेत्।
दिविस्थान्[3] दृष्टिसन्त्रस्तान्[4] विघ्नानुपरिवर्तिनः ॥८५॥
नाराचास्त्रविनिक्षिप्तपुष्पत्रस्तान्नभोगतान्।
करतालत्रयाद्दक्षपार्ष्णिघातत्रयाद्भुवि ॥८६॥
भूमिस्थान्त्रिविधानेवं मन्त्रेणोत्सारयेद्ग्रहान्।
वामशाखाश्रयो मन्त्री देहलीमस्पृशो[5]त्पदा[6] ॥८७॥
प्रासादपश्चिमद्वारं निवृत्तिकलयाश्रितम्।
प्रविशेद्दक्षपादेन विघाटितकावटकम् ॥८८॥
दंष्ट्रभीषणमुग्रास्यं पिङ्गलाक्षं[7] चतुर्भुजम्।
दक्षिणेऽभयशूलाढ्यं तर्जनीशूलसंयुतम् ॥८९॥
वामे त्रिनेत्रमेकास्यं कालाग्निसदृशप्रभम्।
ध्यात्वा सम्पूजयेद्देवं द्वाराधस्थमुदुम्बरे[8] ॥९०॥
ततो निर्ऋतिकोणस्थं ब्रह्माणं वास्त्वधीश्वरम्।
गौगभ[9]मरविन्दस्थं चतुर्वक्त्रं चतुर्भुजम् ॥९१॥
अक्षमालां स्रुवं दक्षे वामे दण्डकमण्डलू[10]।
दधानमष्टनयनं पूजयेत्सृष्टिकारणम् ॥९२॥
गणेशस्यासनं दद्यात्कोणे सामीरणे ततः।
दत्वा गुर्वासनं चेशे पूजाद्रव्यमधाहरेत् ॥९३॥

---

[1] दीर्घं k [2] दिव्यं a [3] दिवसां c, दिवस्तां n [4] सन्त्यक्त्वा i [5] मस्पृशन् [6] हृदा h, सदा i,
[7] लास्यं k, मस्त्रं f [8] घस्थादुदुम्बरे f [9] गौराभं सार e, गौरहं सार a [10] कमण्डलुम् e

तद्द्रव्यं मूलमन्त्रेण दिव्यदृष्ट्यावलोक्य च।
संरक्ष्य चास्त्रमन्त्रेण कवचेनावकुण्ठयेत् ॥९४॥
देवं प्रदक्षिणीकृत्य बह्निकोणं समाश्रयेत्।
न प्राची[1]मग्रतः शम्भोर्नेत्तरां योषिदाश्रयाम्[2] ॥९५॥
न प्रतीचीं यतः पृष्टं तस्माद्दक्षिणमाश्रयेत्[3]।
पश्चिमद्वारहर्म्ये तु यजेन्निर्ऋतिकोणतः[4] ॥९६॥
पासादे पूजयन्नित्यं[5] प्राग्द्वारे चाग्निकोणतः।
उदग्द्वारे मरुद्दिकस्थो दक्षे[6] निर्ऋतिकोणतः ॥९७॥
मृद्वासने कुशस्तीर्णे उपविष्ट उदङ्मुखः।
पद्मासने समासीनः प्राणायामत्रयान्वितः ॥९८॥
मौनी जितेन्द्रियो[7] भूत्वा पञ्चशुद्धिं समाचरेत्।
प्रथमा भूतशुद्धिः स्यात्स्थानशुद्धिस्त्वनन्तरा[8] ॥९९॥
तृतीय द्रव्यशुद्धिःस्याच्चतुर्थी मन्त्रशोधिनी।
पञ्चमी लिङ्गशुद्धिः स्यादुचयन्ते शुद्धयः[9] क्रमात् ॥१००॥
क्रमान्ननु[10] च भूतानि दीक्षया गुरुणाणुभिः[11]।
कृतानि पूर्वमेतेषां शुध्या किं साध्यतेऽधुना ॥१०१॥
सत्य भूतानि शुद्धानि द्विप्रकाराणि[12] तानि तु।
आभ्यन्तराणि बाह्यानि देहे चाभ्यन्तराणि च[13] ॥१०२॥

---

[1] प्राच्या c [2] श्रयात् d [3] दक्षं समाश्रयेत् h [4] कोणगः k [5] येद्देवं b [6] दक्षद्वारे त्रिकोणगः f [7] यतेन्द्रियो l [8] शुद्धिरनन्तरा m [9] इति शुद्धयः n [10] न तु भूतानि शुद्धानि i [11] पुरा l [12] द्विः प्रकाराणि [13] हि c

पडध्वस्थानि बाह्यानि तानि शुद्धानि दीक्षया।
देहस्थानि तु भूतानि शोध्यानि स्युर्दिने दिने ॥१०३॥
निःशेषदग्धपाशस्य[1] भुक्तभोग्यस्य चात्मनः।
निर्दग्धसञ्चिताङ्गस्य[2] कर्मणो निर्मलात्मनः[3] ॥१०४॥
मातापितृमलोद्भूते देहे स्थातुं न युज्यते।
तस्मान्मन्त्रमयः कार्यः[4] क्रियते प्रतिवासरम् ॥१०५॥
धारणाच्छोधिदे[5] देहे शिवः साक्षात्प्रदृश्यते।
माया[6]पाशादितत्कायान्नसाक्षा[7]च्छिव उच्यते[8] ॥१०६॥
अन्तः[9] शुद्धिर्विधात्व्या भूतानां देहवर्तिनाम्।
सा[10]शुद्धिर्धारणायत्ता धारणा कालतत्परा ॥१०७॥
कालान्तः[11] कथ्यते भूतः प्रायः शुद्धिविधायकः।
वेष्टयित्वा त्रिधा जानु[12] मण्डल[13] च्छोटिकां सकृत्[14] ॥१०८॥
कुर्यादेषा भवेन्मात्रा कनिष्ठा कालमानतः।
मध्यमा द्विगुणा सैव त्रिगुणा[15] चोत्तमा मता ॥१०९॥
भवेद्द्वादशमात्राभिः कनिष्ठाभिः कनिष्ठिका[16]।
मध्याभिर्मध्यमा प्रोक्ता[17] चोत्तमाभिःथोत्तमा[18] ॥११०॥
अनेनोद्धातयोगेन धारणामाचरेत्सुधीः।
भूतशुद्धिप्रकारोयं[19] सुस्पष्टमभिधीयते ॥१११॥

---

[1] पापस्य f [2] ताङ्गनि n [3] निष्कलात्मनः a [4] कार्यः c [5] णा शोधिते e [6] मायादि h [7] ससाक्षात् k [8] मुच्यते l [9] अतः m [10] सा शुद्धा शुद्धिः सा i [11] कालातः h कालेन्तः i कालोतः l [12] जानुं e [13] मण्डलं d [14] कास्त्रकृत् a [15] त्रिगुणीनुत्तमा c [16] कनिष्ठकः e [17] उद्धातः i [18] उत्तमः h [19] प्रकारोऽथ k

अथ भूतशुद्धिविधिः

कुर्वीत करयोर्न्यासमङ्गन्यासविवर्जितम्[1]।
मध्यमानामिकाङ्गुष्ठैर्नाभौ पुष्पं प्रधारयेत् ॥११२॥
संहारमुद्रयात्मानं देहाद्धृदयसम्पुटम्।
आदायहृदयाम्भोजे भोग्यकर्मोपभुक्तये ॥११३॥
धारयेद्द्वादशान्ते वा मुद्रया च क्रमस्य[2] वा[3]।
अङ्गुष्ठान्ताग्र[4]मारभ्य पादयोर्द्वादशान्तकाम्[5] ॥११४॥
देहमध्यगतः रन्ध्रे ध्यायेदन्तर्बहिःस्थिताम्।
शम्भोर्नभोमयीं[6] शक्तिं व्यापिनीं शक्तिमन्त्रतः ॥११५।
इडा नाड्या समाकृष्य पूरकेणाग्निसप्रभाम्[7]।
हुङ्कारं रन्ध्रमध्येस्मिन् कुम्भकेना[8]वधारयेत् ॥११६॥
हुङ्कारोपरि विन्यस्य चित्तं तद्ध्यानयोगतः।
हुङ्कारेण फडन्तेत रेचकेनाथ[9] भेदयेत्[10] ॥११७॥
ग्रन्थिहृद्गलतालुभ्रब्रह्मरन्ध्रस्थितानपि।
तस्मान्निर्वर्त्य हुङ्कारं विन्यसेन्नाभिमण्डले ॥११८॥
पूरकाकृष्टचैतन्यं जीवं हृदयसम्पुटम्।
एकाकिनं न्यसेन्मूर्ध्नि हुङ्काकरस्य ह्यनामयम्[11] ॥११९॥
कुम्भकेनाथ[12] तं ध्यायेत्तृणाग्रजलबिन्दुवत्।
अर्केन्दुवह्निशक्तीनां बिन्दु[13]सम्पुटमध्यगे[14] ॥१२०॥

---

[1] वार्जितः b [2] कमठस्य f [3] वाम् i [4] अङ्गष्ठाग्रान्त h, अङ्गुष्ठाग्रादथा k [5] कात् i
[6] नगोमयीं c [7] सम्प्रभम् e, सुप्तगम् l [8] केन च i [9] रेचकेन च l [10] योजयेत् m
[11] ज्ञानामचम् n [12] केनाहृतं d, केनाहृदं n [13] विम्ब m [14] मध्यमे i

शिवे निवेशये[1] ज्जीवमेकोद्धातेन रेचकात्[2]।
करसम्पुटयोगेनःकूर्ममुद्रामथाचरेत् ॥१२१॥
बीजवृत्या शिवे लीनं भूतानि स्वस्वहेतुषु।
संहारवर्त्मना बिन्दुपर्यन्तं विलयं नयेत् ॥१२२॥
शोधयेद्भस्मसङ्घातं निवृत्यादिकलाध्वगम्[3]।
अथवा शोधयेन्मन्त्री षट्त्रिंशत्ततत्त्वसञ्चयम् ॥१२३॥
त्रितत्तवमेकतत्वं वा यथा शोध्यं तदुच्यते।
जलेन शोधयेत्पृथ्वीमुदकं तेजसा तथा[4] ॥१२४॥
तेजो वातेन पवनं पृथ्व्याच गगनं शिवात्।
निष्टप्ताष्ट[5] पदाकारं विश्वसृकुसमधिष्ठितम् ॥१२५॥
कठिनं वज्रघटितं भूबिम्बं[6] चतुरश्रकम्।
विवृत्तिकलया व्याप्तं गन्धादिगुणपञ्चकम् ॥१२६॥
सद्योजातात्मकं[7] ध्यायेच्चरणादुत्तमाङ्गकात्।
निवृत्तिकलया मन्त्री पृथ्वीं च हुम्फडन्तया ॥१२७॥
पञ्चोद्धातैः सपूरैश्च[8] वायु[9] भूतानि शोधयेत्।
खण्डेन्द्वाभं सितं सौम्यं वैकुण्ठाधिष्ठितं वनम्[10] ॥१२८॥
मण्डलं पुण्डरीकाक्षं[11] प्रतिष्टारूपमम्मयम्[12]।
चतुर्गुणगुणाकारं चिन्तयेद्वारि[13] तत्तववित् ॥१२९॥

---

[1] नियोजयेत् m, न योजयेत् i [2] रेचकान् k [3] कलाध्वकम् l [4] तदा i [5] निष्ठस्वष्ठाप c [6] भूर्बिम्बं e [7] जातात्मको d [8] सोपचारैः h [9] पायु k [10] दवम् l [11] कांसं m, कासं i [12] म यथा d, मध्ययम् e

प्रतिष्ठा कलया पूरैस्तद्बिम्बं हुम्फडन्तया[1]।
ध्यायेच्चतुर्भिरुद्घातैस्तेजोरूपं प्रसन्नधी ॥१३०॥
बिम्बमाग्नेयमारक्तं[2] त्रिकोणं स्वस्तिकाङ्कितम्।
रुद्रकारणसम्पन्नं विद्यया कलयाश्रितम् ॥१३१॥
गुणत्रयसमायुक्तं संस्मरेद्धोर[3]तत्ववित्।
विद्यया कलयोद्घातैस्त्रिभिस्तद्धुम्फडन्तया[4] ॥१३२॥
कुम्भकेन स्मरेतेजोविम्बमम्भोमयं सुधीः।
वायव्यं श्यामलं बिम्बं बिन्दुभिः षड्भिरङ्कितम् ॥१३३॥
षट्कोणमीश्वराक्रान्तं शान्ताख्यकलयाश्रितम्।
स्पर्शशब्दगुणाधारं[5] स्मरेत्पुरुषतत्त्ववित् ॥१३४॥
रेचकैः शान्तिकलया तं वायुं हुम्फडन्तया[6]।
शधयेत्पृथिवीरूपमुद्घातद्वितयेन च ॥१३५॥
स्फटिकाभं नभोबिम्बं बिन्दुशक्तिविभूषितम्।
सदाशिवाश्रितं स्वेतं शान्त्यतीतकलामयम् ॥१३६॥
शब्दैकगुणसम्पन्नं भावयेदीशतत्त्ववित्।
एकोद्घातेन रेचेन कलया शान्त्यतीतया ॥१३७॥
प्रान्तहुम्फड्युजा मन्त्री भावयेन्निर्मलं नभः।
भूतानि शोधयित्त्वेत्थं शरीरं सृष्टि[7] मार्गतः ॥१३८॥

---

[1] डन्तया b [2] यकं रक्तं f [3] त्तार i [4] तथा c [5] कारं e [6] हुम्फडं तथा l [7] द्दष्टि h

कलाभिः शान्त्यतीतादिनिवृत्त्यन्ताभि[1]रुक्तवत्।
नमोन्ताभिः सृजेन्मन्त्री मनसा ध्यानयोगतः ॥१३१॥
प्लावयेच्छक्तिमन्त्रेण शरीरं प्रान्तवौषडा।
षडध्वमासनं[2] दत्वा शिवमूर्तिं हृदि न्यसेत् ॥१४०॥
विद्यादेहं[3] च तन्मूर्तौ विद्यादेही[4] शिवात्मकः[5]।
आत्मानं परमानन्दरूपं सञ्चिन्त्य विन्यसेत् ॥१४१॥
प्लावयेत्तमिति[6] प्रोक्ता[7] भूतशुद्धि[8] कलात्मिका[9]।
मन्त्राध्वा च पदाध्वा च[10] वर्णाध्वा भुबनाध्वकः[11] ॥१४२॥
तत्वाध्वेतिध्विशुद्धाः स्युः कलाध्वानि[12] विशोधयेत्[13]।
षट्त्रिंशत्ततत्त्वशुद्धिं[14] वा कुर्यात्साथ निगद्यते ॥१४३॥
पृथिव्यादिशिवान्तानि मन्त्र[15] तत्त्वानि संहरेत्।
प्रणवद्यैश्चतुथर्यन्तैर्हुम्फडन्तैश्च शम्बरैः ॥१४४॥
पृथ्वींच[16] संहरेदप्सु सलिलं ज्वलनेऽनलम्[17]।
वापौ समीरणं व्योम्नि व्योम गन्धेऽथ गन्धकम् ॥१४५॥
क्षिपेद्रसे रसं रूपे रूपं स्पर्शे लयं नयेत्।
स्पर्शं शब्दे च[18] तं शब्दमुपस्थे[19] तदुपस्थकम् ॥१४६॥
गुदे गुदं पदे पादं पाणौ पाणिं वचस्यपि।
वचौ नासापुजे नासां जिह्वायां रसनां दृशि ॥१४७॥

---

[1] निवृत्तां वाभि a, निवृस्यन्तानि k [2] डहुत्थमासनं l [3] देहित्व m [4] विद्यादेहे
[5] शिवात्मकम् d [6] येत्थभिति l [7] प्रोक्त c [8] शुद्धिः 3 [9] कलात्मिके a, कलात्मिकी h
[10] कलाध्वा i [11] भुवनात्मकः k [12] कलाध्वानि b [13] विशोधिते f [14] शुद्धिर्वा m
[15] मन्त्री n [16] पृथिवीं च d [17] जलतोनलम् 3 [18] चर्चितं l [19] पदस्येदुपस्थकम् i

दृशं त्वचि त्वचं श्रोत्रे श्रोत्रं मनसि संहरेत्।
मनो गर्वे त्वहङ्कारं बुद्धौ तां प्रकृतौ क्षिपेत् ॥१४८॥
प्रकृतिं पुरुषे मर्त्यं नियतौ तां नियामके[1]।
काले कालं तु रागे तं विद्यायां लयमानयेत्[2] ॥१४९॥
अविद्यां तां कलातत्त्वे कलां मायोदरे क्षिपेत्।
मायां विद्योदरे विद्यामीश्वरे तं सदाशिवे ॥१५०॥
क्षिपेत्सदाशिवं शक्तौ शक्तिं तां संहरेच्छिवे।
शिवो न कुत्रचिल्लीनः सर्वं व्याप्य व्यवस्थितः ॥१५१॥
इत्थं[3] संहारमोर्गेण संहृत्योत्पादयेतथ।
सृष्टिमार्गेण तत्त्वौघं शिवदीक्षावसानकम् ॥१५२॥
तत्वशुद्धिरियं प्रोक्ता वक्ष्ये तत्त्वत्रयात्मकम्[4]।
आत्मविद्याशिवैस्तत्त्वैः शोधयेद्देहपादपम्[5] ॥१५३॥
धर्माधर्माध्व[6]मूलाढ्यं प्रकृत्यात्मुसुगात्रकम्[7]
इन्द्रियार्थौ[8] महाशाखं विषयच्छदभूषितम् ॥१५४॥
भावप्रपञ्चकुसुमं सुखदुःखफलालयम्।
रागनिर्यासनिलयं विटपं चिन्तये[9]द्वपुः ॥१५५॥
अथवा शिवतत्त्वेन शुद्धिरेकेन संस्मृता[10]।
आत्मशुद्धिं विधायेत्थ कूर्ममुद्रां प्रदर्शयेत्[11] ॥१५६॥

---

[1] नियानकं h [2] कलयां नयेत् k [3] इति i [4] यात्मिकीम् l [5] दुक्तामार्गतः a [6] धर्मेत्थ h
[7] सुगात्रयम् k, सुमात्रकम् b [8] इन्द्रियाधो f [9] वटवच्चिन्त e [10] संस्कृता m [11] परित्यजेत् n

कलाभ्यामीषदामर्घ पुष्पमाघ्राय चास्त्रतः[1]।
क्षिपेत्पुष्पं[2] मरुद्देशे स्यादेतन्मृत्युनाशनम् ॥१५७॥
करन्यासक्रमश्चाथ कथ्यते तन्त्रचोदितः[3]।
हुम्फडन्तास्त्रमन्त्रेण वामहस्ततलं[4] द्विधा ॥१५८॥
मणिबन्धात्समारभ्य संस्पृष्टं[5] दक्ष[6]पाणिना।
प्रमृज्य दक्षपाणिं तु सकृदेवोक्तमार्गतः ॥१५९॥
करावनश्य[7]दाकारौ भावयेद्दग्धरज्जुवत्।
आप्लाव्य तौ करौ प्राग्वत्पद्ममुद्रां प्रकल्पयेत् ॥१६०॥
आसनं कल्पयेत्तत्र कर्णिकायां शिवस्य च।
मूर्तिमावहयेत्तत्र विद्यादेहं कलात्मकम्[8] ॥१६१॥
तद्ध्यायं[9] व्यापकं तत्र शिवं परमकारणम्।
आप्लावनं तत्र शिवं करे[10] परमकारणम् ॥१६२॥
आङ्गुष्ठादिकनिष्ठान्तं करयोरङ्गुलीततौ।
ईशतत्पुरुषाघोरवामजातमनून्यसेत् ॥१६३॥
कनिष्ठादिक्रमेणाथ विन्यसेद्धृदयं[11] शिरः।
शिखां च कवचं नेत्र[12]त्रयं तु तलयो[13]र्न्यसेत् ॥१६४॥
अस्त्रमङ्गुष्ठयोः कुर्यादमृतीकरणं शिवात्।
तौ वर्मणावकुण्ठ्याथ देहन्यास[14] मथाचरेत् ॥१६५॥

---

[1] शास्त्रतः h [2] क्षिपेत्तच्च l [3] चोदितम् i [4] दलं a [5] सृष्टं d [6] दक्षिण i [7] वपश्च e
[8] कलात्मिकम् [9] तद् द्धत्सव्यापकं d [10] करौ i [11] देहन्यासमश्राचरेत् e, देहन्यूनमथाचरेत् l
[12] नेत्रं a [13] कलयो c, कलया k [14] देहन्यून h

मूलधारात्समुद्भूतं कन्दमध्यस्थितं सितम्।[1]
न्यसेदष्टदलोपेतं शिवस्यासनपङ्कजम् ॥१६६॥
कन्दादिबिन्दुपर्यन्तं स्थिरविद्युन्निभां सिताम्।
शिवमूर्तिं परां सूक्ष्मां विन्यसेन्मूर्तिमन्त्रतः ॥१६७॥
भ्रूमध्याद्ब्रह्मारन्ध्रान्तमष्टत्रिंशत्कलामयम्।
सदाशिवात्मकं स्थूलं विद्यादेहं निवेशयेत् ॥१६८॥
विन्यसेद्द्वादशान्तस्थं[3] ब्रह्मरन्ध्राच्छिवं परम्।
ईशानं विन्यसेन्सूर्ध्नि मुष्टेरङ्गुष्ठमूर्ध्वतः ॥१६९॥
अङ्गुष्ठतर्जनीमूर्ध्ना मुखे तत्पुरुषं न्यसेत्।
अङ्गुष्ठमध्यमाभूर्ध्ना त्वघोरं हृदि विन्यसेत् ॥१७०॥
अङ्गुष्ठानामिकाग्रेण वामं गुह्ये निवेशयेत्।
कनिष्ठाङ्गुष्ठयुग्मेन सद्योजातं पदद्वये ॥१७१॥
दण्डभङ्ग्यो[4]दितो न्यासो वक्त्रभङ्ग्याधुनोच्यते।
एताभिः पञ्चमुद्राभिरीशानादिकपञ्चकम् ॥१७२॥
ऊर्ध्वप्राग्दक्षिणादिक्षु पश्चिमे च मुखे[5] न्यसेत्।
वक्त्रभङ्ग्योदितो न्यासः कलाभङ्ग्याधुनोच्यते[6] ॥१७३॥
शशिनी चाङ्गदा चेष्टा मरीचिर्ज्वालिनी तथा।
ईशानसमरूपांस्ता[7]न्मस्तकेषु च पञ्चसु ॥१७४॥

---

[1] शिवम m [2] हृन्मध्ये n [3] शान्तं तं b [4] दण्डवाह्वो d [5] सुख c [6] भङ्ग्याथ कथ्यते b
[7] रूपाश्च f, रूपास्त्र c, रूपास्तु e

पञ्चधा भाजितैशानमन्त्रांशमहितान्नयसेत्।
विन्यसेच्छान्त्यतीतां तु व्यापिनीमूर्ध्ववक्त्रके ॥१७५॥
शान्तिर्विद्या प्रतीष्ठा च निवृत्तिश्च कलाः क्रमात्।
पुरुषस्य विभज्याणुं चतुर्धा तत्पदैः सह ॥१७६॥
पुरुषाख्य[1] शरीरास्त्रं[2] न्यसेन्मुखचतुष्टये।
तमा[3]मोहाक्षयानिष्टामृत्युर्मायाभयाजराः[4] ॥१७७॥
अष्टधा भविता[5]घोरमन्त्रांशसहितां न्यसेत्।
हृद्ग्रीवस्कन्धयुग्मेषु नाभौ कुक्षौ च पृष्ठके ॥१७८॥
उरस्येतास्त्वघोराभवर्णांशास्ताः कलाः क्रमात्।
रजो रक्षा[6] रतिः पाल्या कामिनी पञ्चमी तथा[7] ॥१७९॥
सञ्जिविनी क्रिया वृद्धि[8]च्छाया धात्री[9] च भ्रामिणी[10]।
मोहिनी चाभयाचेति[11] वामस्यैतास्त्रयोदश ॥१८०॥
तत्त्रयोदशधा मन्त्रं विभज्याणुं पदैः सह।
कलास्ता विन्यसेदेषु गात्रस्थानेषु मुद्रया ॥१८१॥
लिङ्गे गुदे तथा चोर्वोर्जान्वोर्जङ्घाद्वयोः स्फिचोः।
कट्यां च पार्श्वयोश्चेति बामदेवकलाः[13] क्रमात् ॥१८२॥
सिद्धिर्ऋद्धिर्द्युतिर्लक्ष्मीर्मेधा कान्तिः स्वधा धृतिः
अष्टधा प्रविभाज्याथ[16] मन्त्रांश[17] सहिताः कलाः ॥१८३॥

---

[1] पुरुवाभ a [2] रास्त्रान् d [3] तमो n [4] ज्वराः m [5] भाजिते k [6] रक्ता h, कक्षा i [7] स्मृता l
[8] बुद्धि j [9] रात्री k [10] भामिनी l, ब्रह्मणी m [11] चालनी a [12] जानुनो a [13] समाः e
[14] वृद्धिः c [15] स्मृतिः b [16] च विभज्याणुं f [17] मन्त्रांशं h

पादयोः करयोर्नासापुटे शिरसि दोर्युगे।
सद्योजातसमानाङ्ग[1]रूपायुधधरान्न्यसेत् ॥१८४॥
कलान्यासः[2] समाख्यातोऽथाङ्गन्यास उच्यते।
नमः स्वाहा तथा वौषट्ढंवषद् फट्-च जातयः ॥१८५॥
न्यासेऽङ्गानि सजातीनि[3] नमोऽन्तानि[4] स्मरन्यदा।
हृदयं हृदये न्यस्य शिरः शिरसि विन्यसेत् ॥१८६॥
शिखां न्यसेच्छिखायां च कवचं सर्वगात्रके।
नेत्रेषु विन्यसेन्नेत्रत्रयमस्त्रं तु हस्तयोः ॥१८७॥
तालानां त्रितयं कुर्याच्छस्त्रेण[5]हृदि मन्त्रवित्।
च्छोटिभिर्विघ्नमस्त्रेण दशदिक्षु निवारयेत् ॥१८८॥
अवकुण्ठ्य तनुत्रेण शरीरं[6] धेनुमुद्रया।
अभिषिञ्चेत्सुधापूरैर्मस्तकाच्चरणावधि ॥१८९॥
न्यासोऽयं सृष्टिमार्गेण संहारो विपरीततः।
इत्थं न्यासं विधायाथ स्थानशुद्धि[7] मथाचरेत्[8] ॥१९०॥
शिवाग्रे मण्डलं कृत्वा षडुत्थासनमर्चयेत्।
हृदा तत्रार्चयेद्भूमिं पाद्याद्यैरुपचारकैः ॥१९१॥
दिव्यदृष्ट्या लयं दृष्ट्वा तालैः सछोटिकैस्ततः।
निवार्यास्त्रेण विघ्नौघं कवचेनावकुण्ठ्य च ॥१९२॥

---

[1] समानानां i [2] करन्यासः k [3] स्वजातानि j [4] न्तास्त्रं तु हस्तयोः m [5] च्छास्त्रेण n
[6] शठरी a [7] शुद्धिं k [8] समाचरेत् l

धेनुमुद्रां महामुद्रां दर्शयेच्छिवशक्तितः।
स्थानशुद्धिं विधायेत्थमन्तर्यागमथाचरेत् ॥१९३॥
शम्भुं हृदम्बजे साङ्गं बहिर्यागविधानतः।
पूजयेदाहृतैर्बुद्ध्या दिव्यदृष्टिकदम्बकैः ॥१९४॥
अहिंसाष्टाङ्गपूतार्घ्यैः सत्यवादैर्दयोदकैः।
शौचाचमनसङ्घातैर्धैर्य[1]गन्धैः सुगन्धिभिः ॥१९५॥
अस्तेय[2]कुसुमस्तोमैस्तपोधूपैः[3] क्षमाक्षतैः।
ज्ञानदीपैः[4] सुसन्तोष्य नैवद्यैरनवद्यकैः ॥१९६॥
अनाहतमहानाद[5]घण्टाभिर्मन्त्र[6]चामरैः।
दमपञ्चामृतैः पूतैः[7]रास्तिक्य[8] व्यजनानिलैः ॥१९७॥
शान्त्यातपत्रसन्दोहैर्मायाभरणनर्तनैः[9]।
एतैरन्यैःसमभ्यर्च्य शिवं सकलनिष्कलम् ॥१९८॥
पूरकाद्द्रुतबिन्दुस्थ[10] सुधासिन्धुसुधाघनैः[11]।
हविर्भिस्तर्पयेदीशं[12] सर्वगं[13] संहिताणुभिः ॥१९९॥
नाभिमण्डलसत्कुण्डे सकलं[14] सहजानले[15]।
भ्रूमध्ये निष्कलं ध्यायेद्बिन्दुमन्दिरमध्यगम् ॥२००॥
शिवं शशाङ्कसङ्काशं बिन्दुरूपं चिदात्मकम्।
पूज्यपूजकभावेन द्विधाभूतं प्रदीपवत् ॥२०१॥

---

[1] चौर्य e [2] आस्तीर्य a [3] धूमैः c [4] पैस्तु h [5] नागं k, नाथा i [6] चछत्र l, मति d
[7] मृता पूरैः a [8] आस्तीर्य e [9] नर्तकैः n, वर्तकैः h [10] बिम्बस्थ k [11] सुधागतैः i [12] ऋर्गं a
[13] स्वर्गः m [14] सकलः n [15] जानने l

आत्मानं भावयित्वेत्थं विदध्याद्द्रव्य[1]शोधनम्।
द्वात्रिंशत्षोडशाष्टौ वा शास्त्रोक्तात् लक्षणान्वितान् ॥२०२॥
वर्धनीशिवकुम्भाद्यानन्यानप्यानयेद्धटान्[2]।
वीक्षणादिविशुद्धान्[3] तान् क्षालयेदस्त्रमन्त्रतः ॥२०३॥
ब्रह्माङ्गमन्त्रजप्तेन वस्त्रशुद्धेन वारिणा।
गोभृङ्गरत्न[4]गाङ्गेय[5] फलपल्लववारिणा ॥२०४॥
अन्येनापि च कोष्ठेन नालिकेरकुशाम्बुना।
गायत्र्या पूरयेत्कुम्भं दिव्यदृष्ट्यावलोकयेत् ॥२०५॥
प्रोक्षण्या प्रोक्षयेत्सर्वानस्त्रेमापि[6] पताकया।
नाराचमुद्रयास्त्रेण प्रोक्षण्या ताडयेद्धटान्[7] ॥२०६॥
वर्मणाभ्युक्षयेत्सर्वान्[8] तथोत्तान[9] पताकया।
गङ्गादितीर्थमाकृष्य बिन्दोरङ्कुशमुद्रया ॥२०७॥
संहारिण्या समादाय तीर्थं[10] मुद्भवमुद्रया
हृतां तेषु विनिक्षिप्य षड्भिरङ्गैश्च मन्त्रयेत् ॥२०८॥
अस्त्रमन्त्रेण संरक्षेच्छोटिभिर्दशदिक्षु तान्।
अवकुण्ट्य घटान् सर्वान्वर्मणा वर्ममुद्रया ॥२०९॥
संहिताशम्बरैरर्घ्यं विशिष्टमभिमन्त्रयेत्।
सक्षेदस्त्रेण पात्राणि कवचेनावकुण्ठयेत् ॥२१०॥

---

[1] दिव्य l [2] नप्याहरेत्तथा i [3] वीक्षणे दिवि शुद्धांस्तान् e [4] ङ्गारक्त d [5] तुङ्गेन c
[6] द्विपताक्रया i [7] येतसतान् h [8] क्षय तान् सर्वान् k [9] तस्योक्तेन m [10] पश्चात् n

धेनुमुद्रां महामुद्रां दर्शयेच्छिवसक्तितः।
इत्येतान् दशसंस्कारान्विदध्याद्द्रव्यशुद्धये ॥२११॥
चतस्त्रे वीक्षणाद्याश्च कर्तव्याः शुद्धयः सदा।
पात्रशुद्धिं विधायेत्थं कुर्यादर्घ्यादिशोधनम् ॥२१२॥
चतुष्कमर्घ्यपात्राणां क्षालयेदस्त्रमन्त्रतः।
मण्डलं कारयेत्तत्र सूर्यसोमाग्नि[1]संज्ञकम् ॥२१३॥
अर्घ्यपात्रे विशेषाख्ये हृद्बीजेन प्रकल्पयेत्।
पयोभिः पूरयेद्बिन्दु[2]सुधाभिः[3] शक्तिमन्त्रतः ॥२१४॥
तेषु द्रव्याणि निक्षिप्य शास्त्रोक्तानि पृथक्पृथक्।
प्रणवेनाथ वास्त्रेण सामान्यार्घ्यं प्रपूजयेत् ॥२१५॥
ब्रह्मभिस्तान्निरोधार्घ्यं[4] यजेच्चार्घ्यं पराङ्मुखम्।
संहिताशम्बरैरर्घ्यं विशेषार्घ्यं प्रपूजयेत् ॥२१६॥
चतस्त्री वीक्षणाद्यास्ताः कुर्यादर्घ्यचतुष्टये।
गङ्गादितीर्थमाकृष्य क्षिपेदर्घ्यचतुष्टये ॥२१७॥
प्रणवेनाथ वास्त्रेण सामान्यमभिमन्त्रयेत्।
ब्रह्मभिस्तन्निरोधार्घ्यं षड्भिरङ्गैः पराङ्मुखम् ॥२१८॥
संहिताशम्बरैरघर्यं विशेषमभिमन्त्रयेत्।
पाद्यमाचमनं प्राग्वत्पूरयित्वा विशोधयेत् ॥२१९॥

[1] सोमादि l [2] बिन्दुं i [3] स्वधाभैः e [4]सन्निरोधार्घ्यं c

अभावे[1]ऽर्घ्यादि[2]पात्राणां द्वेकुर्यादर्घ्यपात्रके।
द्वारपालादिचण्डान्तं सामान्यार्घ्यं प्रकल्पयेत्[3] ॥२२०॥
निरोधार्घ्यं निरोधे स्याद्यद्वा शम्भोर्विसर्जने।
विशेषार्घ्यं निरोधार्घ्यमाविसर्जन[4]कर्मणः ॥२२१॥
विसर्जने तु देवाय दद्यादर्घ्यं पराङ्मुखम्।
अर्घ्यद्वितयपक्षे स्याद्विशेषार्घ्यं विभोस्तथा[5] ॥२२२॥
सामान्यं द्वारपादीनामर्घ्यं चण्डार्चना[6]न्तकम्।
संस्कुर्याद्गन्धपुष्पादियागद्रव्यकदम्बकम् ॥२२३॥
पूर्वोक्तैर्दशसंस्कारैर्वीक्षणाद्यैः पृथक् पृथक्।
यद्वाभिमन्त्रणे ज्ञेयो विशेषस्तन्मयात्मकः[7] ॥२२४॥
सद्योजातेन वै गन्धं हृदा वा शर्करान्वितम्।
वामेन शिरसा वापि मधुशम्बरमम्बरम् ॥२२५॥
घोरेण[8] शिखया वापि[9] धूपदीप[10] विशेषणम्[11]।
दधिनैवेद्यसन्दोहं वर्मणा पुरुषेण वा ॥२२६॥
अस्त्रेणेशेन वा क्षीरं पुष्पमप्यभिमन्त्रयेत्।
अन्यानि यागवस्तूनि[12] गायत्र्याचाभिमन्त्र[13]येत् ॥२२७॥

अथ पञ्चगव्यामृतविधिः

गव्यामृतविधिं वक्ष्ये विदध्यात्पञ्चकोष्ठकम्।
मध्यतः[14] शिवकोष्ठं स्यात्प्राक्सदाशिवकोष्ठकम्। ॥२२८॥

---

[1] अलाभे a [2] अर्घ्यस्य h [3] प्रयोजयेत् k [4] मविसर्जन n [5] सदा l [6] चण्डासना c
[7] तद्यदात्मकः d, तं मदात्मकः a, तदुदाहृतःh [8] अघोरेण k [9] वा a [10] पाज्य भूषणम् l
[11] विशोधनम् n [12] वस्त्राणि b [13] त्र्यभिमन्त्र f [14] मध्येतच्छिव j

विद्यातत्त्वाख्य[1] कोष्ठं स्याद्दक्षिणाशासमाश्रितम्।
उत्तरे पुरुषं कोष्ठं कालतत्त्वं तु पश्चिमे ॥२२९॥
कोष्ठेषु पात्राण्येतानि विन्यसेत्क्रमशो बुधः।
सुप्रतिष्ठं सुशान्ताख्यं तेजोरूपाख्यपात्रकम् ॥२३०॥
रत्नोदकं[2] चामृतात्मपात्रं गव्यामृतद्वये।
क्षीरं पञ्चपलं[3] ताम्रवर्णायाः सुप्रतिष्ठके ॥२३१॥
शुक्लं दधि सुशान्ताख्यपात्रे त्रिपल[4]मावहेत्।
पलैकं कापिलं चाज्यं तेजोरूपाख्यपात्रके ॥२३२॥
नीलाया द्विपलं मूत्रं तद्वद्रत्नोदके[5] मधु।
गोमयं कृष्णावर्णायाश्चाङ्गुष्ठार्ध[6]प्रमाणकम्[7] ॥२३३॥
अमृतात्मकपात्रे तु न्यसेद्गव्यादिद्रव्यकम्।
पलैकं दर्भसलिलमीशे चैव विनिक्षिपेत् ॥२३४॥
अभोवे कापिलं चापि गव्यवर्णादिकं न हि।
एकद्वित्रिचतुष्पञ्चषड्धा च क्षीरपूर्वकम् ॥२३५॥
ईशतत्पुरुषाघोरवामाजैरभिमन्त्रयेत्।
गायत्र्या सृष्टिमार्गोऽयं संहारो विपरीततः[8] ॥२३६॥
पूर्वं पूर्वं क्षिपेदग्रे मूलमन्त्रेण मन्त्रयेत्।
शतकृत्वेन[9] निक्षेपः पृथक् पञ्चामृतं स्थितम् ॥२३७॥

---

[1] तत्वात्म m [2] रत्नोदयं n [3] पञ्चफलं l [4] त्रिफल b [5] रत्नोदये f [6] अङ्गुष्ठाग्र a [7] प्रमाणतः e
[8] विपरीतकः c [9] कृत्वो न h

गव्यामृतौघसंशुद्धिं विदध्याद्धृदयेन वा।
एवं स्यात्पञ्चगव्यस्य शुद्धिः पञ्चामृतस्य च ॥२३८॥
अर्घ्ये विलेपने स्नाने त्रिषु गन्धं प्रयोजयेत्।
आवाहनाघर्यपाद्येषु[1] स्नाने धूपे विलेपने[2] ॥२३९॥
विसर्जने च नैवेद्ये पुष्पमष्टसु योजयेत्।
द्रव्यशुद्धिं विधायेत्थमर्घ्यं[3] घनरसैः शिरः ॥२४०॥
प्रोक्षण्या प्रोक्षयेत्स्वस्य मूलेन प्रान्तवौषडा।
ललाटे तिलकं कुर्याच्चन्दनेन शिवाणुना[4] ॥२४१॥
अष्टपुष्पिकयात्मानं मस्तके सम्प्रपूजयेत्।
उष्णीषमुत्तरीयं च धारयेद्धेमभूषणम् ॥२४२॥
रुद्राक्षमालां[5] वलयं ततो[6] वाचंयमो[7] भवेत्।
इत्थमात्मार्चनं कृत्वा विदध्यान्मन्त्रशोधनम् ॥२४३॥
मन्त्राध्वविमलाक्रान्ताः[8] शिवोक्ताः[9] सप्तकोटयः।
विज्ञानाकलरूपास्ते यागायोग्या[10] ह्यशोधिताः ॥२४४॥
तस्मात्संशोधयेन्मन्त्रांच्छिवतत्त्वसुयोगतः[11]।
रसयोगाद्यथाताम्रं विमलं हेम जायते ॥२४५॥
तद्वत्स्युर्विमला[12] मन्त्राः योग्याश्च शिवयोगतः।
ह्रस्वदीर्घप्लुतान् बिन्दुब्रह्मारन्ध्रशिवान्तगान्[13] ॥२४६॥

---

[1] पात्रेषु k [2] विलोचने i [3] मर्घ्येर्घ्येण l [4] हृदाणुना h [5] माला i [6] धृता c [7] तापं मयो e
[8] क्रान्त l [9] अपक्का c [10] यागथोग्या e [10] तत्त्वं स्वयोगतः d [11] त्सुविमला a
[12] शिखान्तकान् h [13] केचित्पूजां k

मन्त्रान् समुच्चरेन्मन्त्री क्रमेणानेन तत्ववित्।
मन्त्रशुद्धिं विधायेत्थं लिङ्गशुद्धिमथाचरेत् ॥२४७॥

अथ लिङ्गशुद्धिविधिः

प्रोक्षयेदस्त्रमन्त्रेण सामान्यार्घ्यजलेन च।
कनिष्ठाङ्गुष्ठयोगेन किञ्चित्पूजां[1] पुराकृताम् ॥२४८॥
व्यपोह्यास्त्रेण[2]पुष्पं तु गायत्र्या लिङ्गमस्तके।
मध्यमानामिकाङ्गुष्ठैरुत्तानैरधिरोपयेत् ॥१४९॥
तद्वत्स्वाहान्तमूलेन सामान्याघर्यमुपाहरेत्।
न्यसेच्छिरस्सु[3] मुद्राभिः पञ्चसु ब्रह्मपञ्चकम् ॥२५०॥
लिङ्गान्निर्माल्यमादाय चण्डेशाय सुरक्षयेत्[4]।
अस्त्रेणवामहस्तेन पिण्डिकां क्षालयेज्जलैः ॥२५१॥
लिङ्गं तु दक्षहस्तेन गन्धाद्य[5]पनयावधि[6]।
न वामेन स्पृशेल्लिङ्गं पिण्डिकां चैव न स्पृशेत् ॥२५२॥
सामान्यार्घ्यं शिवे दद्यात्पूर्ववन्मूलमन्त्रतः।
लिङ्गमुद्रां हृदा बद्ध्वा शिवशक्त्याणुना स्पृशेत् ॥२५३॥
पूर्वमङ्गुष्ठतो लिङ्गं पश्चात्पीठं तु मुष्टिना।
भुक्तौ सृष्टिक्रमोऽयं[7] स्यान्मुक्तौ तूक्तविपर्ययः ॥२५४॥
इत्थं भूता[8]श्रयद्रव्यमन्त्रलिङ्गविशुद्धयः।
कृताः पञ्च क्रमाद्येन स पूजां कर्तुमर्हति ॥२५५॥

---

[1] केचित्पूजां k [2] ह्यमाणे n [3] च्छिरस्समुद्राभिः a [4] निवेदयेत् j [5] गन्धाद्युप a [6] विधिः c
[7] यस्य a [8] भूत्वा l

कालेऽस्मिन् चललिङ्गे तु प्रदद्यादष्टपुष्पिकाम्।
गव्यादिस्नपनं कुर्यात्स्थिरे[1] त्वावाहनोर्ध्वतः ॥२५६॥
पञ्चशुद्धिं विधायेत्थं वायव्ये विघ्ननायकम्।
अभ्यर्च्य प्रार्थयेद्देवं[2] विघ्नसङ्घनिवृत्तये ॥२५७॥
शिवर्चने[3] गणेशान निर्विघ्नं कुरु मे सदा।
ततः प्रसन्नवदनान्योगपट्टधरान् गुरून् ॥२५८॥
अक्षसूत्रधरान् व्याख्यामुद्रढ्यानीशकोणगन्।
शिवादिस्वगुरुप्रान्तान् गुरूनावह्य पूजयेत् ॥२५९॥
शिवादिगुरवो मह्यमनुज्ञां दातुमर्हथ।
शिवार्चनं करिष्येऽहं युष्मद्दार्शितमार्गतः ॥२६०॥
कुरु पुत्रेत्यनुज्ञातः शिवस्यासनमर्चयेत्।
तदासनं पृथिव्यादिशुद्धविद्यान्ततत्त्वगम् ॥२६१॥
तदासनधरान्देवानिमानाराधयेत्क्रमात्।
कूर्मपृष्ठ[4]समासीनां शरच्चन्द्रसितप्रभाम् ॥२६२॥
बीजाङ्कुरसमाकारां दधनां सृष्टिसञ्चयम्।
सदाशिवादिभूम्यन्तां देह[5]पादतले स्थिताम्[6] ॥२६३॥
आधारशक्तिमीशस्य पीठमध्ये समर्चयेत्।
ततो ब्रह्मशिलासीनमनन्तं कमलाकृतिम् ॥२६४॥

---
[1] स्थिते c [2] एवं h [3] र्चनं k [4] कूर्मासनं j देहे i, [5] देही h [6] स्थितः e

भूनिवृत्त[1]महत्कन्दं प्रतिष्ठोदकनालकम्।
विद्याग्निफणपत्राढ्यं[2] दुग्धसिन्धुसमप्रभम् ॥२६५॥
अङ्गेऽङ्गयादिगलप्रान्तं[3] व्याप्तं सञ्चिन्त्य पूजयेत्।
वायुशान्तिकलासिंहपीठपादचतुष्टये ॥२६६॥
आग्नेयदिग्गतं धर्मं[4] वायुदिग्वदनं सितम्।
नैर्ऋत्यदिग्गतं ज्ञानं रक्तमीशानदिङ्मुखम् ॥२६७॥
वैराग्यं वायुदिक्संस्थं पीत[5]माग्नेयदिङ्मुखम्।
ऐश्वर्यमीशदिक्संस्थं कृष्णं निर्ऋतिदिङ्मुखम् ॥२६८॥
सिंहरूपधरान् त्र्यक्षान् दंष्ट्रालान् ससटाजटान्[6]।
धर्मादीन् स्वसमाकारान् परिवारोपसेवितान् ॥२६९॥
धृतगात्रानुत्तमाङ्गैः[7] कामरूपान् प्रपूजयेत्।
तत्पीठफलका[8]कारान् स्तब्धसर्वाङ्गविपग्रहान् ॥२७०॥
सिंहशीर्षस्थितान्योन्यपादसंस्थितमस्तकान्।
अधोमुखान्नराकारान्निर्मलस्फटिकप्रभान् ॥२७१॥
कामरूपधरान् त्र्यक्षान् स्वखवर्गसमावृतान्[9]।
कृतत्रेतादिकैः श्वेतरक्तपीतासितप्रभैः ॥२७२॥
आग्नेयादिचतुष्कोणस्थितैः कीलैः सुयन्त्रितान्।
ऋग्यजुस्सामसन्धानपट्टिकाभिः सुसंहितान्[10] ॥२७३॥

---

[1] वृत्ति d [2] पात्राढ्यं e [3] तलप्रान्तं l [4] सौम्यं c [5] पीठ h [6] च्छटान् k [7] ग्रात्रं तूत्तमाङ्गैः b
[8] पालका f [9] समाहृतान् i [10] ससंहितान् h

यजेदधर्ममज्ञानमवैराग्यमिदं क्रमात्।
अनैश्वर्यं चतुर्दिक्षु शरीरे बिन्दुकान् स्मरेत्[1] ॥२७४॥
ततो[2]ऽधच्छदनं रक्तं माया[3]राग[4]विवर्जितम्[5]।
तमः[6]स्थूलसुसंपूर्णं निर्ऋतौःदिशि पूजयेत् ॥२७५॥
अथोर्ध्वच्छदनं श्वेतं शुद्धविद्याविराजितम्।
व्याप्तं सत्वगुणेनैशमासनं सम्प्रपूजयेत्[7] ॥२७६॥
ततोऽनन्तं सुसम्फुल्लफणादलसहस्रकम्।
विद्येश्वरसमारूढं धवलं कमलं यजेत् ॥२७७॥
शिवासनोपरि ततः पद्ममुद्रां प्रदर्शयेत्।
निष्ठाप्ताष्टपदाभासां पञ्चाशद्वर्णबीजकाम् ॥२७८॥
सहस्रकेसराकीर्णां सुवृत्तां कर्णिकां यजेत्।
आदिमध्यान्तभागेषु हेमरक्तसितान् क्रमात् ॥२७९॥
कर्णिकापरितो व्याप्तान् केसरान् सम्प्रपूजयेत्।
अष्टैश्वर्यस्वरूपाणि दलान्यष्टौ प्रपूजयेत् ॥२८०॥
चतुःषष्टिकलारूपाः किरीटर्धेन्दुमण्डिताः।
सहस्रबिम्ब[8]मार्तण्डमण्डलप्रोल्लसद्युतीः ॥२८१॥
एकवक्त्रा त्रिणेत्राश्च रक्तभूषाश्चतुर्भुजाः।
शम्भुसम्बद्धहस्ताब्जाः प्रोद्धूतश्वेतचामराः ॥२८२॥

---

[1] क्रमात् l [2] स्मरेत् c [3] मयं e [4] रङ्ग h [5] विराजितम् i [6] ततः k [7] व्यापकं यजेत् d
[8] सिंह, j सङ्घ्य m

वराभयकराम्भोजाः शम्भोरभिमुखस्थिताः।
प्राच्याद्यष्टककुप्पत्र[1] किञ्जल्काग्रप्रतिष्ठिताः ॥२८३॥
अष्टौ सम्पूजयेच्छक्तीर्वामाद्या यौवनोज्वलाः।
क्षीरार्णवसवर्णां तु कर्णिकायां मनोन्मनीम् ॥२८४॥
सम्पूज्य मध्यतस्तासु नमो मुद्रां प्रदर्शयेत्।
दलाग्रव्यापकं पूर्वे पूजयेत्सूर्यमण्डलम् ॥२८५॥
ब्रह्माणमधिपं तस्य पूजयेदग्निकोणकम्[2]।
किञ्जल्कव्यापकं दक्षे पूजयेत्सोममण्डलम् ॥२८६॥
तन्मण्डलाधिपं विष्णुं यजेन्निर्ऋतिकोणकम्।
प्रतीच्यां कर्णिकाव्याप्तं पूजयेदग्निमण्डलम् ॥२८७॥
तन्मण्डलाधिपं रुद्रं पूजयेद्वायुकोणगम्।
त्रिबिम्ब[3]व्यापकं सौम्ये शक्तिमण्डलमर्चयेत् ॥२८८॥
शिवं तन्मण्डलाधीशमीशकोणे प्रपूजयेत्।
आत्मतत्त्वं यजेद्दक्षे विद्यातत्त्वमथोत्तरे ॥२८९॥
शिवतत्त्वं यजेन्मध्ये क्रियाशक्तिं तदूर्ध्वतः।
धरादि[4]शुद्धविद्यान्तमित्थं पीठं प्रभोर्यजेत् ॥२९०॥
सहस्रसूर्यसङ्काशां ज्ञानशक्तिं यजेत्ततः।
तत्र सिंहासने दिव्ये स्थिरविद्युत्समप्रभाम्[5] ॥२९१॥

[1] ककुप्तत्र n [2] कोषतः e [3] त्र्ययावं, c त्रयीमयं d [4] धारदि a [5] विद्युत्प्रभस्वमाम् h

योजनानां लक्षकोटिविस्तीर्णां बिन्दुरूपिणीम्[1]।
सहस्रसूर्यसङ्काशां सूर्यसोमाग्निदुर्गमाम् ॥२९२॥
सूक्ष्मामीश्वरतत्त्वान्तां[2] शरीरे कूर्चसंस्थिताम्।
शिवमूर्तिं परामेतां संस्मृत्य[3] ध्यानयोगतः ॥२९३॥
पुष्पैरञ्जलिमापूर्य[4] हृत्प्रदेशे निधाय तम्।
मन्त्रं बिन्द्वन्तमुच्चार्य नीत्वा कूर्चान्तमञ्जलिम्[5] ॥२९४॥
आनीय हृदये रेचन्[6] पुष्पाञ्जलिगतं न्यसेत्।
तन्मूर्तौ सकलावस्थमष्टत्रिंशत्कलामयम्[7] ॥२९५॥
षडध्वात्मकाषट्कोश[8]शरीरेण विराजितम्।
ईशोत्तमाङ्गं पुंवक्त्रमघोरं हृदयाम्बुजम् ॥२९६॥
वामं गुह्यमजाताख्य[9]मूर्ति[10] चन्द्रा[11]र्बुद[12]प्रभम्।
शुद्धस्फटिकसङ्काशं द्वात्रिंशल्लक्षणान्वितम् ॥२९७॥
द्व्यष्टसंवत्सराकारं जटाजूटविभूषितम्।
नानारत्नकिरीटाढ्यं शशिशेखरभूषितम् ॥२९८॥
ईशाद्यैः स्फटिकस्वर्णनीलरत्नेन्दुसप्रभैः।
पञ्चभिर्वदनैर्युक्तमीशानादिस्वरूपकैः ॥२९९॥
इच्छाज्ञानक्रियारूपं प्रतिवक्त्रं त्रिलोचनम्।
वरदाभ्यखट्वाङ्गशक्तिशूलानि दक्षिणे ॥३००॥

---

[1] रूपकाम् k [2] सुसूक्ष्मामीश्वरां तां तां, i सूक्ष्मांशामीश्वरान्तां तां h [3] संस्कृत्य j
[4] पुष्पाञ्जलिसमापूर्य a [5] मञ्जरीम् l [6] रेचि c [7] मयीम् l [8] हृत्कोश a [9] ताख्यां l [10] मूर्तिं h
[11] वत्त्रां [12] अम्बुज k [13] प्रभाम् j

बीजापूराग्नि[1]डमरुनीलाब्जाक्षाणि वामके।
वरदं रुचकं[2] चेशे खट्वाङ्गं डमरुं नरे[3] ॥३०१॥
शूलसर्वाविघोरे च वामे चाभयमुत्पलम्।
सद्योजातेऽक्षशक्ती च शिवा[4]स्त्राणि यथाक्रमम् ॥३०२॥
दधानैर्दशभिर्हस्तैर्दिव्यरूपैर्विराजितम्[5]।
हारकङ्कणकेयूरमुद्रिकाभिर्विभूषितम्[6] ॥३०३॥
शार्दूलचर्मवसनं बद्धपद्मासनस्थितम्।
धरादि[7]शक्तिपर्यन्त[8]भुवन[9]व्यापकं परम्[10] ॥३०४॥
भ्रूमध्यब्रह्मरन्ध्रान्त[11] शरीरावयवस्थितम्।
विद्यादेहं विभाव्येत्थं कृत्वा पुष्पाञ्जलिं हृदि ॥३०५॥
शम्बरं ब्रह्मारन्द्रान्तमुच्चार्योद्धृत्य चाञ्जलिम्।
आनीय हृद्यथादाय कृत्वा रेचकमादरात् ॥३०६॥
पुष्पाञ्जलिगतं ध्यात्वा न्यसेदारोहगोचरे।
इत्थमञ्जलि[12] मादाय बद्ध्वा चावाहनीं दृढाम्[13] ॥३०७॥
इडया वायुमापूर्य समाकुम्भ्य[14] सुषुम्नया।
अप्रमेयमनिर्देश्यमनौपम्यमनामयम् ॥३०८॥
सूक्ष्मं सर्वगतं नित्य ध्रुवमव्ययमीश्वरम्।
सर्वज्ञादिगुणोपेतं जगत्सर्गादिकारणम् ॥३०९॥

---

[1] पूराहि b [2] डमरुं f [3] करे i [4] शिखा, a मुखा b [5] दिग्रूपैस्सविराजितम् f
[6] कादि विभूषणम् c [7] ईशादि l [8] पर्यन्तं c [9] भुवनं e [10] चरम a [11] रन्ध्रादि h
[12] हृदञ्जलि d [13] बुधः h [14] समकुम्भ k समाकुञ्चय i

षडध्वव्यापकं व्योमस्थितं शान्तं चिदात्मकम्।
स्वसंवेद्यं शिवं ध्यात्वा शरीरे द्वादशान्तकम् ॥३१०॥
मूलाधारात्समाकृष्य मन्त्रमुच्चार्य चाशिवात्।
पुष्पाञ्जलिं समुद्धृत्य द्वादशान्तपदावधि ॥३११॥
अथाकृष्य[2] ततो वायुं नीत्वा पुष्पाञ्जलिं भुवि।
शिवं सम्भाव्य विश्रान्तं[3] बिन्दुमन्दिरमध्यगम् ॥३१२॥
तत[4] आनीय[5] हृद्देशे धारयित्वाञ्जलिं पुनः।
वायुं पिङ्गलया रेच्य ध्यात्वा चाञ्जलिमध्यगम् ॥३१३॥
अजेन[6] शिवमावाह्य वामदेवेन भावतः।
स्थापिन्या स्थापयेद्देवं मुद्रया मूर्तियुग्मके ॥३१४॥
सन्निधान्या त्वघोरेण ध्यायेत्सन्निहितं शिवम्।
सन्निरुद्धं[7] शिवं ध्यायेत्पुंसा[8] निष्ठुरथा सुधीः ॥३१५॥
ईशानेन निरोधार्घ्यं शिवायेशादिपञ्चसु।
स्वाहान्तमुत्तमाङ्गेषु मृग्या दद्यात्सपुष्पकम् ॥३१३॥
हुम्फडन्तास्त्रमन्त्रेण कालकण्ठाय[9] भावतः।
पुष्पक्षेपसुसन्त्रेस्तु[10] विघ्नौघं विनिवारयेत् ॥३१७॥
लिङ्गमुद्रां नमोमुद्रां बद्ध्वा[11] हृदयसन्निधौ।
हृदा सन्दर्शयेन्मन्त्री शिवाय प्रीतिहेतवे ॥३१८॥

---

[1] स्वयं d [2] अपकृष्य e [3] दिव्याङ्गं j [4] तत्र, b अत f [5] स्वानीय a [6] अनेन l [7] रुध्यं a
[8] द्विया e [9] कर्ष्याय c [10] सन्त्रस्तं h [11] मुद्रा i

कवचेन नमोऽन्तेन पुष्पैः कवचमुद्रया।
प्रकुर्यादप्रकाशार्थं नीलकण्ठेऽवकुण्ठनम् ॥३१९॥
कुर्वीत पूर्वव[1] न्न्यासं शिवं ब्रह्मकला[2]दिकम्।
नमोन्तमूलमन्त्रेण परमीकारहेतवे ॥३२०॥
पुष्पं शिरसि द्धस्य दद्यान्मृग्याख्यमुद्रया।
नमस्कारान्तमूलेन धेनुमुद्रां कपर्दिने ॥३२१॥
तत्पादान्तं[3] दर्शनीयममृतीकार[4]कर्मणि।
प्ररोचनार्थमीशाय शक्तिमन्त्रेण सादितः[5] ॥३२२॥
वौषडन्तेन मूर्धान्तं महामुद्रां प्रदर्शयेत्।
हृदि बद्ध्वा नमोमुद्रामिति[6] सम्प्रार्थयोच्छिवम् ॥३२३॥
स्वामिन् सर्वजगन्नाथ यावत्पूजावसानकम्।
तावत्त्वं प्रीतिभावेन लिङ्गेऽस्मिन् सन्निधिं कुरु ॥३२४॥
स्वागतं ते शिव स्वामिन् क्रियमाणां मया प्रभो।
पूजां गृहाण कृपया मदनुग्रहहेतवे ॥३२५॥
ममास्तु[7] स्वागतं वत्स कुरु पूजां यथागमम्।
स्वीकरोमि प्रसन्नस्ते शिवोक्तमिति भावयेत् ॥३२६॥
आवाहनादिकस्याथ प्रोच्यते[8] लक्षणं शुभम्।
ध्यायतः श्रद्धया सम्यङ्गनसा पूजकस्य यत् ॥३२७॥

---

[1] रूवैंवं k [2] लया j [3] कात्पादान्त b [4] ह्यमृतीकरण f [5] पादतः, i चादितः d चादतः c
[6] हृदि i [7] मम सुस्वागतं j [8] स्वरूपं सन्निरुव्यते b

आभिमुख्यं शिवस्यैतदावाहनमुदाहृतम्।
स्थिरेण मनसा भक्त्या लक्ष्यभूतौ निवेशनम् ॥३२८॥
आराधनेन[1] देवस्य यदेतत्स्थापनं मतम्।
त्वदीयोहमनुग्राह्यः स्थातव्यं भवता प्रभो ॥३२९॥
आराधकस्य भावोऽयं सन्निधानं बुधैः स्मृतम्[2]।
पूजावसानपर्यन्तं न गन्तव्यं[3] त्वयान्यतः ॥३३०॥
हृहण भगवन्पूजामित्येतत्सन्निरोधनम्।
अपक्वपाशबद्धेषु[4] दीक्षाहीनजनेष्वपि ॥३३१॥
श्रीकण्ठस्या[5]प्रकाशाय[6] तत्स्मृतं[7] ह्यवकुण्ठनम्।
यथा दीधितिभिर्वह्निर्यथा सोमो यथा रविः ॥३३२॥
तथा विद्यातनुर्देव[8]स्तदङ्गैः शक्तिभिः शिवः।
अङ्गाङ्गिनोर्यदैक्यं[9] स्यात्परमीकरणं हि तत्[10] ॥३३३॥
चिच्छक्तिर्हृदयं शम्भोरष्टैश्वर्यं शिरः[11] स्मृतम्।
अनन्याधीनतां[12] शम्भोर्वशिता[13] सा शिखा परा[14] ॥३३४॥
तेजः शर्वस्य[15] दुर्भेदं धर्मत्वेन[16] विनिर्मितम्।
इच्छाज्ञानक्रियास्तत्र[17] त्रीणि नेत्राणि शक्तयः ॥३३५॥
प्रभोः प्रतापः[18] प्रथितः शस्त्रं[19] स्याद्विघ्ननाशनम्[20]।
सर्वाङ्गैः[21] सर्वभावानामन्तर्भावो विसर्जनम् ॥३३६॥

---

[1] धकेन f [2] कृतम् i [3] मागन्तव्यं n [4] बन्धेषु m [5] श्रीकम्ठस्य e [6] प्रकाशो यः c [7] कथितं h, पठितं, k पतितो m [8] तनुत्रेण n [9] नोरथैक्यं d [10] महत् a [11] शिवं d [12] धिकतां c [13] वसिता e [14] दिकान्मता d [15] सर्वसदुर्भेदं h [16] वर्म तेन k [17] स्तिस्र c [18] प्रभावः d [19] शस्तं a, शास्त्रं i [20] नायकः h [21] सर्वाङ्गे

इति सञ्चिन्त्य देवाय पाद्यादीनि निवेदयेत्।
साधकस्येशतत्त्वाख्य[1] पदा पादकमुद्धृतम् ॥३३७॥
पाद्यं पादाम्बुजद्वन्द्वे[2] बिन्दून्तं शम्भुशम्बरम्[3]।
पुष्पैर्नमोन्तमुच्चार्य शिवया विनिवेदयेत् ॥३३८॥
सदाशिवपदप्राप्तिहेतुराचम[4]नीयकम्।
शम्बरं ब्रह्मरन्ध्रान्तं समुच्चार्य[5] स्वधान्तकम् ॥३३९॥
पुरुषाघोरवामाजे[6] शाख्यास्वेष्वेषु[7] पञ्चसु।
पाद्य[8]मुद्धृत्य देवाय प्रदद्याद्देशिकोत्तमः ॥३४०॥
ईशतत्पुरुषाघोरवामजान्तेषु मूर्धसु।
स्वाहान्तमूलमुच्चार्य द्वादशान्तपदावधि ॥३४१॥
शिवतत्त्वपदप्राप्तिहेतुमर्घ्यं सुपुष्पकम्।
सयन्त्रिकं[9]समुद्धृत्य दद्याद्देवाय बुद्धिमान् ॥३४२॥
शिवमन्त्रं समूच्चार्य वौषडन्तं शिवान्तकम्।
ईशादिसद्यपर्यन्तेषूत्तमाङ्गेषु पञ्चसु ॥३४३॥
आत्मज्ञानमयं[10] पुष्पं शिवसायुज्यसाधकम्[11]।
सुगन्धिगन्धसम्पन्नं शिवाय विनिवेदयेत् ॥३४४॥
आवाहनं स्थापनं च सान्निध्यं सन्निरोधनम्।
सकलीकरणं[12] चैव परमीकरणं[13] तथा ॥३४५॥

---

[1] तत्त्वाख i [2] दन्द्व j [3] शंवरम् e, शंखरम् l [4] हेतुमाचम c [5] यदुच्चार्च e [6] वामाङ्गे b [7] स्वास्येषु f [8] पात्र m [9] सयन्त्रतं n [10] मथ a [11] कारकम् b [12] काचरमिक f [13] वरणं वाथ, c पाद्यकम् e

पाद्यं चाचमनं चार्घ्यं पुष्पं[1] च दश संस्क्रियाः।
संस्कारानन्यथा त्वन्ये प्राहुस्ते सम्मतांश्च[2] ये ॥३४६॥
द्वात्रिंशत्षोडशाष्टौ वा पञ्च वा चोपचारकान्[3]।
यथासम्भवतो भक्त्या विदध्याच्छम्भवे बुधः ॥३४७॥
दद्यात्स्वाहान्तमूलेन ताम्बूलं शम्भवे बुधः।
महाघण्ठासुनिर्घोषं[4] कुर्याद्यवनिकां ततः ॥३४८॥
घटिकाद्वयपर्यन्तं नित्यं संस्नापयेच्छिवम्।
अनुज्ञां देहि देवेश स्नापनार्थं कृपाकर ॥३४९॥
शिवमभ्यर्च्य गव्येन सर्पिषा वा सुगन्धिना।
हस्तपन्त्रोत्थतैलेन नमोऽन्तेन शिवाणुना ॥३५०॥
समभ्यर्च्य शिवं भक्त्या दर्भदूर्वाक्षतांस्तथा।
गीतवाद्यसमायुक्तं स्वाहान्तं मस्तकेऽर्पयेत् ॥३५१॥
शर्वमुद्वर्तयेच्चूर्णैः सकर्पूरैः सचूर्णितैः।
यवव्रीहिहरिद्रोत्थैर्ननमोन्तास्त्रेण सर्वतः ॥३५२॥
वज्रस्वस्तिकशूलादिस्वरूपैर्निर्मितैः[5] शुभैः।
हरिद्रारञ्जिता[6]न्नाद्यैर्दूर्वाकार्पासवीजकैः[7] ॥३५३॥
सुभद्रै[8]र्द्रव्यसन्तोहैरेतैर्नित्यं यजेच्छिवम्।
सुगन्धिना सुखोष्णेन शीतलेन[9] च वारिणा ॥३५४॥

---

[1] मष्टपुष्प च संस्कृता d [2] सम्मतानि हि n [3] कारकान् n [4] च निर्घोषं k, विनिर्घोषं h
[5] रमितैः d [6] रजता a [7] बीजग्कैः i [8] सुपदैः d [9] शीतलस्नान n

कषायहेमरत्नादिफलपल्लववारिणा।
पञ्चगव्यामृतैः सार्धैः[1] सधूपैर्गन्धवारिणा ॥३५५॥
स्वाहान्तैः संहितामन्त्रैर्ब्रह्मभिर्यदिवाङ्गकैः।
मूलेन वा हृदा देवं[2] स्नापयेन्मङ्गलस्वनैः ॥३५६॥
वामहस्ततले न्यस्य कलशं[3] शङ्खमुद्रया।
सप्रसूनं समर्प्यार्घ्यं पुष्पं पूर्वसमर्पितम् ॥३५७॥
कनिष्ठङ्गुष्ठयुग्मेन व्यपोह्य करमस्त्रतः[4]।
प्रक्षाळ्य स्नापयेद्देवं नोच्चलद्भिर्जलैः शनैः ॥३५८॥
यागद्रव्यकदम्बानि स्नानतोयैर्न[5]सेचयेत्।
पुष्परिक्तं[6] न कुर्वीत सर्वदा शिवमस्तकम् ॥३५९॥
दीपप्रभागन्धपुष्पधूपामोदे न दोषकृत्।
सुसूक्ष्मशुद्धवस्त्रेण कवचेन नमोऽन्तकम् ॥३६०॥
निमृज्य सर्वगात्राणि स्नानपानीयनुत्तये[7]।
ततः पूर्वोक्तमार्गेण शर्वाथार्घ्यं समर्पयेत्[8] ॥३६१॥
धरीदिशिवपर्यन्ततत्त्वात्तारक[9]मुत्तमम्[10]।
ईशस्नपनमित्युक्तं साधकस्यार्थसिद्धये ॥३६२॥
प्रच्छादनपटं त्यक्त्वा कुर्यान्नीराजनं प्रभो।
महाघण्टानिनादेन वाद्यमङ्गलनिस्वनैः ॥३६३॥

---

[1] स्साघ्र्यैः m [2] द्येवं e [3] कत्रवं a [4] करमस्ततः j [5] स्नानतोयेन h [6] पुष्परत्नेन k
[7] वायूपनुत्तये i [8] निवेदयेत् j [9] ततोत्तारक i [10] मुत्तरम् d

सुगन्धिगन्धं देवाय गन्धतन्मात्रगोचरम्[1]।
नमोन्तमूलमन्त्रेण व्यजनं शम्भवेऽर्पयेत् ॥३६४॥
मायाक्षोभाद्यसं[2]क्षुब्धशिवत्वप्राप्तिहेतुकम।
वौषडन्तं शिरःसङ्घैः शिवायाक्षतमर्पयेत् ॥३६५॥
शर्वाय पूर्ववत्पुष्पं दद्यादण्डादिमाल्यकम्।
दद्याद्वस्त्रे सिते शुद्धे देवाङ्गादिसमुद्भवे ॥३६६॥
स्वाहान्तमुपवीते[3] च पुंस्तत्त्वप्राप्तिहेतवे।
शर्वायाभरणं सर्वं स्वर्णरत्नविनिर्मितम् ॥३६७॥
मूलाणुना नमोऽन्तेन विद्यातत्त्वाप्तिहेतुकम्।
दद्याद्देवाय सद्धूपं सहजादिमलापहम् ॥३६८॥
स्वाहान्तमूलमन्त्रेण देशिको दीपयोजितम्।
दद्यादाचमनं प्राग्वत्स्वधान्तं[4] शम्भवे सकृत् ॥३६९॥
ज्ञानशक्तिपद[5]प्राप्तिनिमित्तं दीपयोजितम्।
प्रदक्षिणभ्रमं दीपं स्वाहान्तं शम्भवेऽर्पयेत् ॥३७०॥
प्राग्वदाचमनं दत्वा प्रदद्यादष्टपुष्पिकाम्।
पाद्यमाचमनं चार्घ्यं दद्यात्पुष्पं च पूर्ववत् ॥३७१॥
शम्भोः पादाम्बुजद्वन्द्वे दद्यात्पुष्पाञ्जलिं बुधः।
ब्राह्माद्यावरणं शम्भोः पूजयामि तवाज्ञया ॥३७२॥

[1] चोचयम् d [2] क्षोभ्यद्ययं c [3] मुपवीतं a [4] स्वाहान्तं e [5] चिदं c

पूजयेदभ्यनुज्ञातः शम्भोरावरणं क्रमात्।
पञ्चब्रह्मषडङ्गानि प्रथमावरणे यजेत् ॥३७३॥
वेद्येश्वरा द्वितीये स्युर्नद्याद्यष्टौ तृतीयके।
चतुर्थे लोकपालाः स्युर्लोकपास्त्राणि[1] पञ्चमे ॥३७४॥
पञ्चावरणमार्गोऽयं नित्यनैमित्तिकादिषु।
एक[2]मावरणं नित्ये यदि वावरणत्रयम् ॥३७५॥
पञ्च नैमित्तिके काम्ये षट्सप्ताष्टनवात्मकम्।
तत्रापि पूर्ववत्पञ्च षष्ठे स्युः सप्तमातरः ॥३७६॥
सगणेशाः सप्तमे तु वसवोष्टौ प्रतिष्ठिताः[3]।
एकादशाष्टमे रुद्रा ह्यादित्या नवमे मताः[4] ॥३७७॥
नवावरणमार्गोऽयमुच्यते च क्रमाद्यथा[5]।
शुद्धस्फटिकसङ्काशमीशानं सृष्टिकारणम् ॥३७८॥
तत्तु चामीकरच्छायं सुस्मितं पालकं[6] नरम्।
अघोरं भीषणं कृष्णां जगत्संहारकारणम् ॥३७९॥
वामं शृङ्गारिणं[7] सक्तं मोहकं दर्पणेक्षणम्।
सानुग्रहमजाताख्यं चन्द्राभं ध्यानतत्परम् ॥३८०॥
अन्येऽनुग्राहकं प्राहुरीशानं मोहकं नरम्।
लयकारणकं चैव घोररूपमुदाहृतम् ॥३८१॥

---

[1] वज्राद्यायुध d [2] एव h [3] प्रकीर्तिताः c [4] क्रमात् e [5] मया d [6] बालकं a [7] श्रङ्गारिहं n

पातारं वामदेवं तु सृष्टारमजमित्यपि।

पञ्चैतान् पञ्चधा ख्यातान्[1] प्रतिवक्त्रं त्रिलोचनान् ॥३८२॥

जटाकिरीटखण्डेन्दुकपालदलमण्डनान्।

दशवाहून् दशकरैर्दधानान् दक्षवामकैः ॥३८३॥

त्रिशूलमभयं खड्गं बाणमक्षाणि चोर्ध्वतः।

कमण्डलुं धनुः खेटं वरदं च सरोरुहम् ॥३८४॥

वद्धपद्मासनान्[2] सर्वान् शिवाभिमुखवक्त्रकान्।

ईशेन्द्रयमसौम्याप्यदिक्पतेष्वम्बुजासानान् ॥३८५॥

मस्तकेभ्योऽथ वक्त्रेभ्यो हृदयाद्गुह्यकात्तनोः[3]।

शिवस्याङ्गेभ्य[4] एतेभ्यः प्रदीपाद्दीपकानिव[5] ॥३८६॥

स्वमन्त्र[6]ध्यानयोगांस्तानाकृष्याङ्कुशमुद्रया।

आवाह्य स्थाप्य सान्निध्यसन्निरोधौ विधाय च ॥३८७॥

पाद्यमाचमनं चार्घ्यं पुष्पं गन्धाक्षतादिकम्।

माल्यालङ्कारवस्त्राणि दद्यात्तेभ्यो यथाक्रमम् ॥३८८॥

एपावरणदेवानां पूजा स्या[7]च्छम्भुना सह।

ततो हृदथमिन्द्वाभं[8] शिरश्चामीकरप्रभम् ॥३८९॥

शिखां दाडिमपुष्पाभां कवचं भृङ्गसप्रभम्।

नेत्रत्रयं सिताभासमुग्रमस्त्र[9]मथाग्निवत् ॥३९०॥

---

[1] तुण्डाढ्यचान् f [2] तथा बद्धासनान् सर्वान् e [3] मूर्तयोः l कार्तयोः i

[4] शिवाङ्गभ्यस्सवान्तेभ्यः a [5] दिव दीपिका d [6] स्वमन्त्रैः b [7] पूजान्य f [8] मिन्द्राभं h

[9] मुग्रवक्त्र k

एतानि पञ्चवक्त्राणि त्रिपञ्चाक्षीणि भूषणम्।
जटामुकुटचन्द्रार्धान् दशबाहून् वहन्ति[1] च ॥३९१॥
दक्षिणे शूलमभयं खड्गं बाणाक्षमालिके।
वामे डमरुकं[2] चापं खेठं वरदमन्बुजम् ॥३९२॥
अथवा चतुरास्यानि चतुर्बाहुषु दक्षिणे।
वहन्ति शक्तिवरदौ वामे शूलभये तथा ॥३९३॥
द्विभुजान्येकवक्त्राणि वरदाभ्यकानि च।
वह्नीशानिर्ऋतिमरुच्छक्रदिक्षु यथाक्रमम् ॥३९४॥
पञ्चाङ्गान्यथ शस्त्रं तु चतुर्दिन्दलकं यजेत्।
शिवास्य हृदयाच्छीर्षाच्छिखायाः सर्वगात्रकात् ॥३९५॥
नेत्रत्रयादथास्त्रेभ्यः प्राग्वदाकृष्य पूजयेत्।
प्रथमावरणं प्रोक्तं द्वितीयावरणं ब्रुवे ॥३९६॥
अनन्तेशश्च सूक्ष्मश्च शिवोत्तमैकनेत्रकौ।
एकरुद्रस्त्रिमूर्तिश्च श्रीकण्ठाख्यशिखण्डिनौ ॥३९७॥
रक्तं शुक्लं च नीलं च हेमाभं कृष्णवर्णकम्।
कपिलं चारुणाभासं कज्जलाभं यथाक्रमम् ॥३९८॥
एकवक्त्रान् त्रिणेत्रांश्च जटामुकुटमण्डितान्।
सर्वाभरणसंयुक्तान् शिवज्ञानैकपारगान्[3] ॥३९९॥

[1] दधन्ति m [2] कमण्डलुं n [3] नाञ्च तारकान् d

चतुर्भुजयुतान् दक्षे टङ्कं[1] वरदमन्यतः।
शूलाभये दधानांस्तान्प्राग्वत्पूर्वादितोऽर्चयेत् ॥४००॥
द्वितीयावरणं प्रोक्तं कथ्यतेऽथ तृतीयकम्।
वृषभं पुण्यपुञ्जाङ्गं[2] श्वेतं वृषसमाकृतिम् ॥४०१॥
तीक्ष्णशृङ्गं चतुष्पादं यजेत्पूर्वे महाबलम्।
अग्नेय्यां नन्दिनं श्यामं चतुर्बाहुं त्रिलोचनम् ॥४०२॥
दक्षिणे साभयवरौ[3] वामतो दण्डशूलिनौ[4]।
याम्ये गणपतिं रक्तं चतुर्वाहुं त्रिलोचनम् ॥४०३॥
दक्षिणे वर[5]दन्तौ च वामे चाङ्कुशलड्डुके।
नौर्क्र्त्यां तु महाकालं चतुर्वाहुं त्रिलोचनम् ॥४०४॥
दक्षिणेऽबयवज्राढ्यं वामतः[6] सवराङ्कुशम्।
ब लार्कसान्निमं बालं षण्मुखं द्वादशाक्षकम् ॥४०५॥
रक्तभूषाम्बरं पीनं कुमारं प्रियदर्शनम्।
मयूरवाहनारूढं यजेद्द्वादशहस्तकम् ॥४०६॥
शक्तिं बाणं च खड्गं च चक्रं चापं प्रसारितम्।
दक्षिणेऽदक्षिणे भो शूलखेटककार्मुकम् ॥४०७॥
पताकां पिञ्छमुष्टी[8] च तर्जनीं च प्रसारिताम्।
दधानं करसङ्घातैर्ध्यात्वा सम्पूजयेत्ततः[9] ॥४०८॥

---

[1] शङ्कं c [2] पूजाङ्गं e [3] वरम् a [4] शूलिनम् n [5] पाश d, भयवज्राढ्यं e [6] तस्तु i [7] मपि a
[8] मुष्टिं l [9] सम्परि पूजयेत् k

भृङ्गिणं पिङ्गलं वायौ चतुर्बाहुं त्रिलोचनम्।
दक्षिणेऽभयटङ्काड्यं वामे वरदशूलिनौ[1] ॥४०९॥
उत्तरे द्विभुजां गौरीमेकास्यां शुभ्र[2]विग्रहाम्।
स्वरूपामुत्पलद्वन्द्वविराजितकराम्बुजाम् ॥४१०॥
ऐशान्यां श्यामलं चण्डं[3] हस्त[4]द्वन्द्वं द्विलोचनम्।
शूलटङ्क[5]धरं दक्षवामयोर्जटिलं यजेत् ॥४११॥
एतेषां बहवो भेदाः शक्त्या[6] वक्तुं न ते पृथक्।
उक्ताः प्राथमिका[7] भेदाश्चतुर्थावरणं ब्रुवे ॥४१२॥
ऐन्द्रयामिन्द्रं सहस्राक्षं यजेच्छामं चतुर्भुजम्।
दक्षिणेऽभयवज्राढ्यं वामे च वरदाङ्कुशौ ॥४१३॥
आग्नेय्यामग्निमारक्तं चतुर्हस्तं द्विलोचनम्।
शक्त्यक्ष[8]सूत्रकं दक्षे वामे वर[9]कमण्डलू ॥४१४॥
याम्ये यमं चतुर्हस्तं कृष्णमुग्रं द्विलोचनम्[10]।
दण्डाभयधरं दक्षे वामे पाशवरान्वितम् ॥१४५॥
नैर्ऋत्यां निर्ऋतिं नीलं व्यक्षं भीमं चतुर्भुजम्।
खड्गाभयधरं दक्षे वामे सवरखेटकम् ॥४१६॥
वारुण्यां वरुणं श्यामं व्यक्षं श्रान्तं चतुर्भुजम्।
पाशाभयधरं[11] दक्षे वामे वरदवारिजम् ॥४१७॥

---

[1] शूलिनम् h [2] श्याम m [3] खड्गं [4]अस्त्र j [5] शूलाकुश d [6] शक्त्या e [7] पृथगिमा a
[8] शक्त्याख्य a [9] कर d [10] त्रिलोचनम् l [11] खड्गाभयवरं दक्षे वामे सवरखेटकम् c

वायव्ये त्र्यम्बकं वायुं धूमाभं च चतुर्भुजम्।
दक्षेऽङ्कुशपताकाढ्यं वामे सवरवारिजम् ॥४१८॥
पीतं कुबेरं कौबेर्यां चतुर्बाहुं त्रिलोचनम्।
गदाभयधरं दक्षे वामे वरनिधी ततः[1] ॥४१९॥
शुक्लमीशानमैशान्यां चतुर्बाहुं त्रिलोचनम्।
शूलाभयधरं दक्षे वामे पाशं[2] वरान्वितम् ॥४२०॥
पीतं ब्रह्माणमष्टाक्षं चतुर्वक्त्रं चतुर्भुजम्।
सदण्डकुण्डिकं[3] वामे[4] चैशान्यां ससृगक्षकम् ॥४२१॥
विद्युन्निभमनन्तं च चतुर्बाहुं च नैर्ऋते।
दक्षे सचक्रकमलं सगदं[5] शङ्खमन्यतः ॥४२२॥
अथवा द्विभुजान् सर्वान् सवराभयकान् यजेत्।
बहुप्रकारा लोकेशाः कथ्यते पञ्चमावृतिः ॥४२३॥
नानावर्णधरं वज्रं शक्तिश्रीहेमसुप्रभम्।
दण्डं कृष्णं नराकारं खड्गं नीलोत्पलप्रभम् ॥४२४॥
पाशं किंशुक[6]सङ्काशमङ्कुशं सितवर्णकम्।
स्त्रीरूपां तु गदां रक्तां विद्युदाभं त्रिशूलकम् ॥४२५॥
आरक्तवर्णं कमलं चक्रं स्यादतसी[7]समम्।
सर्वानेतान्द्विहस्ताढ्यान् द्विनेत्रानेकवक्त्रकान् ॥४२६॥

---

[1] निधानकम् n [2] स्वरवारिजम् m [3] गण्डिकां b [4] दक्षे f [5] सन्दोंशं h [6] त्रिशूल h
[7] दसि शङ्खकम् k [8] वस्त्रा e

वराभयकराम्भोजान्सर्वालङ्कारमण्डितान्।
पूर्वादीशान्पर्यन्तं पुनरीशे च निर्ऋतौ ॥४२७॥
इन्द्रादिलोकपास्त्राणि[1] पूजयेत्पञ्चमावृतौ।
पञ्चावरणमार्गोऽयं कथितः सर्वयोग्यकः ॥४२८॥
अन्यावरणदेवास्ते वक्ष्यन्ते[2] काम्यकाण्डके।
इत्थमावरणं चेष्ट्वा शिवमप्यष्टपुष्पकैः ॥२४९॥
पाद्यमाचमनं चार्घ्यं पुष्पं प्रग्वन्निवेदयेत्।
शिवे पुष्पं समारोप्य मूलमन्त्रेण भावतः ॥४३०॥
शम्भुदीधितिसङ्घातनिमग्नान् सकलान् स्मरेत्।
सर्वावरणदेवानां पृथग्भावं न कारयेत् ॥४३१॥
धेनुमुद्रां महामुद्रां दर्शयेत्पूर्ववच्छिवे।
गन्धादिभिस्ततो घण्टामर्चयेदस्त्रमन्त्रतः ॥४३२॥
धूपमाचमनं दीपं प्राग्वत्साङ्गाय शम्भवे।
नानावाद्यस्वनैर्दद्याच्छङ्खघण्टानिनादकैः ॥४३३॥
नमोन्तवर्ममन्त्रेण पुष्पं सार्घ्य[6]जलं तथा[7]।
पुरः[8] प्रदक्षिणीकृत्य चास्त्रेणारात्रिकं[9]क्षिपेत् ॥४३४॥
प्रच्छादनपटं कृत्वा महाघण्टां प्रताडयेत्।
दद्याद्देवाय नैवेद्यमन्नाद्यं[10] भक्षणान्वितम्[11] ॥४३५॥

---

[1] पालानि c [2] कथ्यन्ते d [3] सार्घ्यं d [4] त्रिचा c [5] पुनः a [6] आरात्रिके e [7] नानाभक्ष c
[9] घृतान्वितम् h

सूपशाकदधिक्षीरलेह्यचोष्यफलादिकम्।
स्वाहान्तमूलमन्त्रेण शिवायावरणैः सह ॥४३६॥
वाद्यमङ्गलनिर्घोषैः शङ्खघण्टास्वनैः सह।
दद्यात्सवाहान्तमूलेन पानीयं शीतलं शुभम् ॥४३७॥
दर्शयेद्द्रव्यदां मुद्रां नमोऽन्तं शम्भवे तदा।
निवेदितं शिवो भुङ्क्ते घटिकार्धावसानकम् ॥४३८॥
तावत्कालं जपं कुर्याच्छिवसंसक्तमानसः।
परिवारबलिं दद्यात्परिवारांशकल्पितात् ॥४३९॥
शिवेन भुक्तं साङ्गेन स्मरे[1]दावरणैः सह।
हस्तप्रक्षालनं दद्यात्प्राग्वदाचमनं पुनः ॥४४०॥
हस्तोद्वर्तनताम्बूलमुखवासं च शम्भवे।
दद्यात्स्वाहान्तमूलेन ततो यवनिकां त्यजेत् ॥४४१॥
महाघण्टाध्वनिं कृत्वा[2] कुर्यान्नीराजनं[3] शिवे।
नमोऽन्तं दर्पणं दद्यात्स्वाहान्तं व्यजनं भवेत्[4] ॥४४२॥
चछत्रं तु वौषडन्तेन प्रदद्यात्पिञ्छ[5]चामरे।
ततो द्वाङ्कुरं दर्भं[6] गन्ध[7]पुष्पाक्षतान्वितम् ॥४४३॥
पवित्रं वाङ्मनःकाथयातदोषनिबर्हणम्।
शिवविद्यात्मतत्त्वेन स्वाहान्तेन शिवाणुना[8] ॥४४४॥

---

[1] भवेत् k [2] त्यक्त्वा l [3] निर्मत्सनं c [4] शिचे h [5] पञ्ज k [6] गन्धं i [7] दर्भं d [8] णादिणानुना i, [9] नादिनाणुना h

दद्याच्छिवाय साङ्गाय शिवसायुज्यहेतवे।
आत्मविद्यादि[1] मार्गेण ममुक्षुस्त[2]त्पवित्रकम् ॥४४५॥
ब्रह्मविष्णिवन्द्रदेवाद्यैर्बाह्यस्थैः शिवसेवकैः।
स्तोत्रैः[3] पौरणिकैः श्रोतै[4]र्मन्त्रैर्गीतै[5]रनेकधा ॥४४६॥
स्तूयमानं शिवं तुष्टं[6] स्मरेत्पूजकपूजया।
शिवाय संहितामन्त्रैः प्रदद्यादष्टपुष्पिकाम् ॥४४७॥
पाद्यमाचमनं चार्घ्यं पुष्पं दद्याच्च पूर्ववत्।
धूपमाचमनं दीपं प्राग्वदाचमनं शिवे ॥४४८॥
पुष्पाञ्जलित्रयं दत्त्वा साधको जपमाचरेत्।
त्रिविधः स जपो ज्ञेयो मानसोपांशुभाषितः[7] ॥४४९॥
मानसो[8] मनसा[9] कार्यो मन्त्रवाक्यार्थचिन्तथा।
उपांशुरोष्ठसंस्पन्दमात्रः[10] स्वश्रुतिगोचरः ॥४५०॥
उच्चैर्बाह्यजपः प्रोक्तः परश्रवणगोचरः।
मुक्तिदो मानसो[11] ज्ञेयो ह्यापाशुः सर्वसिद्धिदः ॥४५१॥
क्षुद्रकर्मणि वाह्यः स्थादित्युक्तस्त्रिविधो जपः।
अक्षमाक्तां तथा[12] शुद्धां पूजितां हृदयागुना ॥४५२॥
मध्यमानामिकाङ्गुष्ठैर्गृहीत्वा जपमाचरेत्।
मन्त्रमुच्चार्य भोगार्थी पुष्ट्यादौ तूर्ध्वमुन्नयेत् ॥४५३॥

---

[1] विद्या च k [2] क्षुस्तु m [3] श्रौतैः n [4] स्तोत्रैः j [5] मन्त्रगीतै b [6] तूर्ष्णीं f [7] भाष्यतः l, वाह्यतः f [8] भाप्यतो n [9] मनसो n [10] मन्त्रस्वामिस्तुति m [11] मनसा h [12] यतः d

मुमुक्षुरक्षमेकैकं विलोम्यान्त्यादधो[1] नयेत्।
अङ्गुष्ठतर्जनीभ्यां स्यान्मालाकर्षाच्च[2] मध्यमा ॥४५४॥
कनिष्ठाङ्गुष्ठयोगेन कनिष्ठा सिद्धिरीरिता।
अक्षमाला प्रगोप्तव्या जपकाले[4] सुमेधसा ॥४५५॥
परदृष्टिगता माला निष्फला जपकर्मणि।
जपकाले ह्यक्षमालां गुरोरपि न दर्शयेत् ॥४५६॥
सुखासनसमाविष्टो रक्षिताक्ष उदङ्मुखः।
नासाग्रन्यस्तदृङ्मौनी विदध्यादात्मरक्षणम् ॥४५७॥
स्रवत्पीयूषसङ्घातं प्लाविताशेष[5]दिक्तटम्।
स्मरेदूर्ध्वमधस्ताच्च चन्द्रमण्डलसम्पुटम् ॥४५८॥
बिम्ब[5]सम्पुटमध्यस्थं सुधाधारापरिप्लुतम्।
स्वदेहं चिन्तयेद्भक्त्या[6] जपकाले सुधात्मकम् ॥४५९॥
आत्मरक्षा बवेदेषा त्रिदशैर्नापि भिद्यते।
आत्मरक्षां विधायेत्थं मन्त्ररक्षामथाचरेत् ॥४६०॥
रेचयेदुदराद्वायुं दक्षनाड्यास्त्रमन्त्रतः[7]।
इडया पूरयेद्बाह्यं विभुना[8] वायुनोदरम् ॥४६१॥
अपानमूर्ध्वमुत्कृष्य प्राणापनो निरुध्य च।
कुम्भेन मनसा वायुं सुषुम्नायां नियोजयेत्[9] ॥४६२॥

---

[1] विलोस्याच्छादसो e [2] कर्षं च c [3] कोलेषु h [4] प्लावितश्लेष k [5] बिम्बं i, पिब h
[6] च्छत्तया e [7] दक्षिण्या मस्रमन्त्रातम् l [8] शम्भुना n [9] याभिधीयते l

सुषुम्नामध्यसंस्थायां हृद्देशे शिवसंयुजि।
मन्त्रं नियोजयेन्मन्त्री चिच्छक्तौ मन्त्रमातरि ॥४६३॥
मन्त्राक्षराणि मणिवत्प्रभावां[1] मन्त्रदेवताम्।
गमागमप्रयोगेण स्मरेन्मन्त्रं जपेत्सुधीः ॥४६४॥
निवेशयेन्महामन्त्रं[2] पुरुषेण नियोजयेत्।
शान्तः[3] स्याच्छिवसंयुक्तः पुंयुक्तः शम्बरो जडः ॥४६५॥
तस्माच्छक्तिगतं मन्त्रं भुक्तिमुक्तिफलप्रदम्।
वाच्यवाचकसम्बद्धं[4] जपेत्तद्गतमानसः ॥५६७॥
मन्त्ररक्षा भवेदेषा संहितासु सुरक्षिता।
शिवशक्तिस्त्रिधा सैव सुषुम्नेडा च पिङ्गला ॥४३७॥
अग्निसोमार्करूपेण प्राणस्तासु प्रवर्तते।
ऊर्ध्वप्राणो दिवा[5] प्रोक्त[6]मपानो रात्रिरुच्यते[7] ॥४६८॥
यदा गच्छेदिडानाडीं[8] पिङ्गलां प्राणमारुतः।
प्रातःसन्ध्या तयोः सन्धिः सन्ध्यान्या[9] विपरीततः ॥४६९॥
इडानाडीं गते प्राणे तदास्यादुत्तरायणम्।
अयनं दक्षिणं प्रोक्तं मारुते पिङ्गलां गते ॥४७०॥
तला[10]मेषाख्यविषुवे मध्यनाड्यामधो[11] र्ध्वतः।
नाड्योः[12] सङ्क्रमणं प्राहुः सङ्क्रान्तिं पिङ्गलेडयोः ॥४७१॥

---

[1] प्रभायां c, प्रभवन्मन्त्रदेवता e [2] न शिवे योजवेन्मन्त्र a [3] शान्तौ h [4] सम्बन्धं k [5] दिन i
[6] प्रोक्तः b [7] रिष्यते f [8] नाड्यां m [9] न्यन् n [10] इडा a [11] मथो d

प्रयाति पिङ्गलादूर्ध्वं[1] पिङ्गलेडागतो मरुत्।
सूर्यसोमोपरागोऽयं भुक्तिमुक्तिफलप्रदः ॥४७२॥
रात्रौ चन्द्रोदये मन्त्रं भुक्तिकामो जपेत्सदा।
दिवा सूर्योदये मन्त्रं मुक्तिकामो जपेत्सदा ॥४७३॥
इत्थं विदित्वा यत्नेन जपकर्म समाचरेत्।
जपकर्मक्रमः[2] सोऽथ सुस्पष्टं प्रणिगद्यते ॥४७४॥
नाभ्यादिद्वादशान्तस्थां[3] सोमसूर्याग्निरूपिणीम्।
आनन्द[4]रूपिणीं शक्तिं सुशुम्नान्तर्गतां पराम् ॥४७५॥
आधारचक्रमाकुञ्च्य बोधयित्वानिलेन ताम्।
ब्रह्माणं केशवं रुद्रं ईश्वरं च सदाशिवम् ॥४७६॥
हृत्कण्ठतालुभ्रूमध्य[5] ब्रह्मस्थानेषु[6] तान् क्रमान्।
त्यक्त्वा त्यक्त्वा स्वमन्त्रांशं[7] विद्युल्लेखानिभं बुधः ॥४७७॥
मन्त्रं नादान्तमुच्चार्य मूलधारगतं पुनः[8]।
गमागमप्रयोगेण जपेत्साष्टशतं तथा ॥४७८॥
अष्टाविंशतिमष्टौ वा गुरुणा वा यथोदितम्।
इत्थं कृत्वा जपेन्मत्री शिवसायुज्यकारकम् ॥४७९॥
अक्षमालामथाङ्गुष्ठे न्यसेद्दक्षकरोदरे।
अस्त्रवर्महृदा[9]मन्त्रैः वामाङ्गुष्ठेन चन्दनैः ॥४८०॥

---

[1] नाड्या e [2] कुण्डलीकुण्डं c, पिङ्गलैरूर्ध्वं d [3] क्रियस्याथ c [4] न्तान्तान् h [5] अनन्त k
[6] भ्रूब्रह्म j [7] रन्ध्रस्थानेषु a [9] समन्त्रांशं i [10] वुवः l [11] वर्मच्छदा c

मण्डलत्रितयं कृत्वा तत्रेशं संहिताणुभिः।
पुष्पैः सम्पूज्य संशोध्य वामपाणितले ततः ॥४८१॥
त्रिबिम्बं पूर्ववत्कृत्वा दक्षाङ्गुष्ठेन शम्बरैः।
चुलुकेन गृहीत्वार्घ्यं तक्षपाणितलोपरि ॥४८२॥
वामपाणितलं कृत्वा सम्पुटीकृत्य तौ हृदि।
भूमिष्ठदक्षजानुः सन् श्लोकमेकमुदीर्य च ॥४८३॥
गुह्यातिगुह्यगोप्ता त्वं गृहाणास्मत्कृतं जपम्।
सिद्धिर्भवतु मे येन त्वत्प्रसादात्त्वयि स्थिते ॥४८४॥
मूलमन्त्रं समुच्चार्य शिवं ध्यात्वा यथोचितम्।
वरहस्ते जपं जप्तं पूर्णचन्द्रसमप्रभम् ॥४८५॥
स्वाहान्तं शम्भवे धीमान्दद्यादुद्भवमुद्रया।
ब्रह्मादिशम्बरं जप्त्वा दशांशेन[1] संम ततः[2] ॥४८६॥
ब्रह्मादिभ्यो जपं दद्यादर्घ्यतोयेन पूर्ववत्।
ततः पृष्पाञ्जलिं दत्त्वा कृताञ्जलिपुटः पठेत्[3] ॥४८७॥
गद्यपद्यमयं स्तोत्रं स्तवं पौराणिकादिकम्।
ब्रह्मोक्तं[4] लिखितं[5] स्तोत्रं पुगणे कूर्मसञ्ज्ञके[6] ॥४८८॥
ब्रह्मोवाचः
नमस्तेऽस्तु महादेव नमस्ते परमेश्वर।
नमः शिवाय देवाय नमस्ते ब्रह्मरूपिणे ॥४८९॥

---

[1] शेनैव a [2] नैशमन्त्रतः l [3] पतेत् c [4] ब्रह्मान्त e [5] लिख्यते a [6] संज्ञिके h, संहिते k

तमोऽस्तु ते महेशाय नमः शान्ताय हेतवे।

प्रधानपुरुषेशाय योगाधिपतये नमः ॥४९०॥

नमः कालाय रुद्राय महाग्रासाय ते नमः।

नमः पिनाकहस्ताय त्रिणेत्राय नमोनमः। ॥४९१॥

नमस्त्रिमूर्तये तुभ्यं ब्रह्मणे[1] जनकाय ते।

ब्रह्मविद्याधिपतये ब्रह्मविद्याप्रदायिने ॥४९२॥

नमो वेदरहस्याय[2] कालकालाय ते नमः।

वेदान्तसारपाराय नमो वेदात्म[3]मूर्तये ॥४९३॥

नमो बुधाय शुद्धाय योगिनांपतये[4] नमः।

प्रहीण[5]शोकैर्विविधैर्भूतैः परिवृताय[6] ते ॥४९४॥

नमोब्रह्मण्यदेवाय ब्रह्माधिपतये नमः।

त्रियम्बकाय देवाय नमस्ते परमेष्ठिने ॥४९५॥

नमो दिग्वाससे तुभ्यं नमो मुण्डाय तुण्डिने[7]।

अनादिमलहीनाय[8] ज्ञानगम्याय ते नमः ॥४९६॥

नमस्ते[9] यागतीर्थाय नमो योगादि[10]हेतवे।

नमो धर्माधि[11]गम्याय ध्यानगम्याय[12] ते नमः ॥४९७॥

नमस्ते निष्प्रपञ्चाय निराभासाय ते नमः।

ब्रह्मणे विश्वरूपाय नमस्ते परमात्मने ॥४९८॥

---

[1] ब्रह्मणो a [2] साराय d वेदान्त e, [3] वेदार्थ a [4] गुरवे e [5] प्रणीह l [6] परिहृताय h [7] दण्डिने i [8] महिमानाय f [9] नमस्ताराय b, नमस्काराय j [10] योगार्थि m, योगार्धि n [11] धर्मादि c [12] योगगम्याय d

त्वयैव[1] सृष्टमखिलं त्वय्येव[2] सकलं स्थितम्।
त्वया[3] संह्रियते विश्वं प्रधानायां[4] जगन्मयम्[5] ॥४९९॥
त्वमीश्वरो महादेवः परब्रह्म[6]महेश्वरः।
परमेष्ठी शिवः शान्तः पुरुषो निष्कलो हरः ॥५००॥
त्वमक्षरः परंजयोतिरोङ्कारः परमेश्वरः।
त्वमेव पुरुषो[7]ऽनन्तः प्रधानः प्रकृतिस्तथा[8] ॥५०१॥
भूमिरापोनलोवायुर्व्योमाहङ्कार एव च।
यस्य रूपं नमस्यामि भवन्तं ब्रह्मसंज्ञितम् ॥५०२॥
यस्य द्यौरभवन्मूर्धा पादौ पृथ्वी दिशो भुजाः।
आकाशमुदरं तस्मै विराजे प्रणमाम्यहम् ॥५०३॥
सन्तापयति यो नित्यं स्वभाभिर्भासयन्दिशः।
ब्रह्मतेजोमयं विश्वं तस्मै सूर्यात्मने नमः ॥५०४॥
हव्यं वहति यो नित्यं रौद्रतेजोमयीतनुः।
कव्यं पितृगणानां च तस्मै वह्न्यात्मने नमः ॥५०५॥
अप्याययति यो विश्वं तस्मै सूर्यात्मने नमः।
अप्याययति ये नित्यं स्वधाम्ना सकलं जगत् ॥५०६॥
पीयते[9] देवतासङ्घैस्तस्मै चन्द्रात्मने नमः।
बिभर्त्य[10]शेषभूतानि योन्तश्चरति सर्वदा ॥५०७॥

---

[1] त्वय्येव e [2] त्वयैव c [3] अथ l [4] प्रधानाय h [5] जगन्मया n [6] परं ब्रह्म k [7] परमो a
[8] तदा i, ततः c [9] विधत्ते e [10] विभज्या l

शक्तिर्माहेश्वरी तुभ्यं तस्मै वायवात्मने नमः।
सृजत्यशेषमेवेदं[1] यः[2] स्वकर्मानुरूपतः ॥५०८॥
स्वात्मन्यवस्थितं[3] तस्मै चतुर्वक्त्रात्मने[4] नमः।
यः शेते शेषशयने विश्वमावृत्य मायया ॥५०९॥
